declare that Lakshmi is a Cetana—a separate entity with the attributes of knowledge, bliss, power and the like; and that She is eternal like the Lord, Her consort.

Some grant that Lakshmi is a Cetana, but deny Her omnipresence, omniscience and omnipotence; they say She is atomic in size; some say She does not come under the category of Isvara, but is one of the souls; a few, Her greatness is not inherent, but bestowed on Her by the Lord for a time. Yet others say She forms a class by Herself being neither the Isvara, nor a Jiva. A few others hold that She is the Sovereign of all except the Isvara, while Narayana is the Sovereign of all including Herself. All these run counter to the clear dictates of the Vedas which must be our first and chief authority on these matters supported, of course, by Samhitas, Itihasas and Puranas. They declare that She is the Sovereign of all souls (ईश्वरीं सर्वभूतानां) as unconditionally as the Lord (ईश्वरः सर्वभूतानां); and so He is the Sovereign of all except Lakshmi as much as She is the Sovereign of all excepting Her Consort. The subordination of the one to the other is voluntary and optional, not obligatory. Her greatness is inherent, and not dependent on another. Though the two are the Paramount Sovereigns, the duality does not show itself as their opinions are always identical. One is the Mother of the Universe, while the other the Father. Thus the Divine Couple, Lakshmi and Narayana are the Para Brahman of the Upanishads

and both together are masters, creators, and saviours, and also the final goal of the Universe.

This is the conclusion arrived at by Ranganatha Muni, or Nanjiyar as he is popularly known, after a thorough and careful study of all authorities and of the works of the earlier Acaryas. He discusses all schools of thought which differ from this and refutes them with proper arguments based on the authority of the Scriptures. He has set down all this in this Bhashya.

## ANALYSIS OF THE BHASHYA.

In an introduction of about eighteen pages, he quotes extensively and explains all the Vedic hymns which deal with Lakshmi: two Sraddha Suktas, Medha Sukta, Aditi Suktas; and his verdict is that Lakshmi, like Narayana, has all the following qualities: She is the creator of the Universe; She is omnipotent and omniscient; by nature fundamentally opposed to all blemishes and the resort of all auspicious qualities. She again pervades, sustains, and rules the Universe; She is the object of worship in all sacrifices; and all the fruits of wealth, realisation of the Soul (Kaivalya), and the attainment of Moksha are under Her control and bestowed on the devotees by Her.

Then begins the Bhashya on the hymn. The word 'Jatavedah' which occurs in the first verse and also in four others is interpreted as Vishnu with an elaborate discussion containing

citations from numerous authorities such as Mahabbharata and Vishnu Purana, Kasyapiya and Mankana Samhitas, Paramatma Sukta and Sariraka Sutras. Then the Bhashyakara proceeds with his Bhashya on the Riks and there are profuse quotations then and there from various authorities in support of his interpretations; and the reader is referred to the index for a detailed list of the same.

In the ninth verse where Lakshmi is referred to as the Sovereign (ईश्वरीं सर्वभूतानां), Nanjiyȧr has launched into an elaborate and long discussion—running to nearly twenty pages—on the concept of Lakshmi. In the course of it he raises many prima facie views, answers them categorically and concludes that names like Sraddha, and Vishnupatni refer to Lakshmi only: She is not subordinate to any one and is only the 'पत्नी' (Consort) of Narayana and not a 'दासी' (slave); both are engaged in the divine cosmic sacrifice of saving the souls and the one is essential for the other and cannot function or be without the other. Then he quotes in extenso many chapters of the Ahirbudhnya Samhita and Lakshmi Tantra in support of his view and winds up by saying that She is the equal of the Lord in all respects. 'The mastery of the Universe is one which inheres in both Lakshmi and Narayana.'

Then he completes his Bhashya on the remaining Riks and concludes the work mentioning his name and that of the master from whom he learnt all those things about Lakshmi.

## CONCLUSION.

I need not dilate upon the merits of the Bhashya, but the intelligent reader can see for himself that it is perfect not only as a commentary, but as a piece of polemics and a type of beautiful literature also. I consider myself extremely fortunate that I have been chosen as the instrument for unearthing and publishing this rare work and I owe all this privilege and fortune to my Guru Sri. Sri Saumya Narayana Acarya of Tirukkottiyur. My respectful homage and salutations to him and to Goddess Lakshmi, the Mother of the Universe and of my humble self.

Pudukotah,
17—7—37.

A. SRINIVASA RAGHAVAN

# CONTENTS

श्रियै नमः

# श्रीसूक्तभाष्यम्

# ŚRĪSŪKTA BHĀṢYAM

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्सांकसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

यामाहुः श्रुतयः सर्वाः पुंप्रधानेश्वरेश्वरीम् ।
अशेषलोकजननी लक्ष्मीर्मामभिवीक्षताम् ॥

यत्पदांभोजघटिता प्रणतिर्दुर्लभान्यपि ।
पदानि परमां मुक्तिं सूते तां श्रियमाश्रये ॥

श्रियः सूक्तं समुदितं यज्जपो मंगलावहः ।
अशरण्यशरण्यं तद्व्याकुर्मो भोगमोक्षदम् ॥

परस्य ब्रह्मणस्तत्वं* यदधीनमधीमहे ।
सा श्रीः स्वरूपरूपाद्यैः सहात्र प्रतिपाद्यते ॥

यदीयनित्यनिर्दोषकल्याणगुणसंहतिः ।
श्रुतिस्मृतिषु शास्त्रेषु दिव्येषु समुदीर्यते ॥

तत्र तावच्छ्रुतयः—**श्रद्धासूक्ते**[1] ।

"श्रद्धया देवो देवत्वमश्नुते । श्रद्धा प्रतिष्ठा लोकस्य देवी ।
सा नो जुषाणोपयज्ञमागात् । कामवत्साऽमृतं दुहाना ॥१॥

---

*रूपम्–पा. [1] यजु. काठक. ३. ३. ९–१२.

श्रद्धा देवी प्रथमजा ऋतस्य । विश्वस्य भर्त्री जगतः प्रतिष्ठा ।
तां श्रद्धां हविषा यजामहे । सा नो लोकममृतं दधातु ।
ईशाना देवी भुवनस्याधिपत्नी ॥२॥

अत्र द्वितीया ऋक् पञ्चपदा । तस्मिन्मन्त्रद्वये लक्ष्म्याः स्वरूपरूपगुणविभवादि सकलवेदवेदान्तसारभूतमाबालपण्डितं प्रसिद्धतरं प्रतिपाद्यते ।

तत्र प्रथमेन मन्त्रेण सर्वेश्वरस्य सर्वेश्वरत्वं तद्विभूतेरपि विभूतित्वं लक्ष्म्यायत्तमिति प्रतिपाद्यते ।

['श्रद्धया देव इत्यादि'] [देवः]-निरुपाधिकद्योतनादिकल्याणगुणविशिष्टः सर्वेश्वरः । [देवत्वं]-ईश्वरत्वं । [श्रद्धया]-श्रद्धापरपर्यायया देव्या श्रिया । [समश्नुते]-प्राप्नोति । तथा वैष्णवे पुराणे

[1]'मेधा श्रद्धा सरस्वती,' [2]'अस्येशाना जगतो विष्णुपत्नी'।
[3]'सुमज्जानये विष्णवे ददाशति' इति श्रुत्यन्तरम् ।
[4]'अनन्या राघवेणाहम्'; [5]'काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्'; [6]'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा';
[7]'यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम' इति ॥

---

1 वि. पु. १. ९. ११९.
2 यजु. सं. ४. प्र.४-१२.
3 यजु. अष्ट. २. प्र. ४. २९. ४.
4 रा. सु. २१-१६.
5 रा. बा. ४-७.
6 रा. आ. ३७-१८.
7 वि. पु. १-८-१७.

[श्रद्धा प्रतिष्ठा लोकस्य देवी]. लोक्यत इति लोकः-असद्व्या-वृत्तं प्रमाणप्रतिपन्नं वस्तुजातं; असद्व्यावर्तकस्य चेतनाचेतनात्म-कस्य सर्वस्य प्रपञ्चस्य। [देवी]-जगदुत्पत्तिस्थितिलयादिना क्रीडन्ती। [श्रद्धा]-साक्षाल्लक्ष्मीः। [प्रतिष्ठा]-प्रतितिष्ठत्यस्यामिति प्रतिष्ठा-आधार-भूता।[1]"आतश्चोपसर्गे" इति अङ्। अथवा अस्य सर्वस्य लोकस्य धारण-पोषणभोग्यप्रदानेन स्थापयित्री। तथा, [2]'विष्टंभो दिवो धरुणः पृथि-व्याः,' [3]'अलमेषा परित्रातुं,' [4]'अभियाचाम वैदेहीमि'त्यादि। [सा नो जुषाणोपयज्ञमागात्] एवंभूता[सा]श्रीः। [नः]-अस्माकं, देवी-समाराधनाय समुद्युक्तानां [यज्ञं] आनुपूर्व्या विधीयमानं स्वप्रीणनम्। [जुषाणा] प्रीयमाणा। [उपागात्] उपगच्छतु। [5]'छन्दसि लुङ्लो-टा'विति लोटो लुङ्। किंविशिष्टा [कामवत्साऽमृतं दुहाना] यस्य यस्य यो यः कामः तस्य तस्य तेन तेन कामेन वत्सभूतेन वत्सला धेनुः वत्सस्य पय इव [अमृतं दुहाना] क्षरन्ती, बहुस्नुतीरिति यावत्। तथा [6]'प्रणिपातप्रसन्ना हि,' [7]'स श्लाघ्यस्स गुणी धन्य' इत्यादि॥

द्वितीयेन मन्त्रेण इष्टापूर्तादिसर्वकर्मसमाराध्यत्वं 'तेषां फल-प्रदातृत्वं च लक्ष्म्याः समर्थ्यते।

[श्रद्धा देवीत्यादि] [ऋतस्य]- सुकृतस्य कर्मणः [प्रथमजा]-[8]'जनसनखने'त्यादिना विट्। [9]'विड्वनोरनुनासिकस्याऽऽत्' इति

---

[1] अष्टाध्यायी–३-३-१०६. [2] (नीलासूक्ते) तै ४-४-१२-५७. [3] रा. सु.-२७-४५. [4] रा. सु. २७-४२. [5] अष्टा. ३-४-६. [6] रा. सु. २७-४४. [7] वि. पु. १-९-१३१. [8] अष्टाध्या. ३-२-६७. [9] अष्टाध्या, ६-४-४१.

आत्त्वम् । समाराध्यत्वेन पूर्वं सन्निहिता [विश्वस्य भर्त्री] [विश्वस्य]-स्थावरजंगमात्मकस्य प्रपञ्चस्य पोषयित्री । [जगतःप्रतिष्ठा] [जगतः]-जङ्गमस्य देवतिर्यङ्मनुष्यात्मकभूतजातस्याधारभूता । कर्मफलभूतेन वृष्ट्यादिना जगन्निर्वाहिका [1]"ततोऽवलोकिता देवा" इत्यादि। [तां श्रद्धां हविषा यजामहे] उक्तगुणविशिष्टां [तां][श्रद्धां]-सर्वेश्वरीं। [हविषा यजामहे] [हविषा]-तस्याः प्रीत्यर्थं प्रदेयेन पत्रपुष्पादिना चरुपुरोडाशादिना वा, आत्मात्मीयेन वा । [यजामहे] समाराधयामः । [सा नो लोकमित्यादि] [सा]-एवमस्मत्समाराधिता । [नः]-समाराधकेभ्यः । [अमृतं लोकं]- नित्यसिद्धं विष्णोः परमं पदं । [दधातु]-ददातु । तथा परमपदविषये- [2]"अत्यर्कानलदीप्तं तत्स्थानं विष्णोर्महात्मनः," इत्यारण्यपर्वणि आर्ष्टिषेणप्रतिपादितम् परमपदविषयवचनं सर्वमत्र लेख्यम् । [3]"त्वं सिद्धिस्त्वं स्वधा स्वाहे"त्यादि, [4]"विमुक्तिफलदायिनी' इत्यन्तं पुराणवचनं सर्वमत्र लेख्यम् ।

[ईशाना देवी भुवनस्याधिपत्नी] [भुवनस्य]-चिदचिदात्मकस्य कृत्स्नस्य प्रपंचस्य । [ईशाना]-स्वभावतो नियन्त्री ; अनन्याधीनेश्वरीत्यर्थः । [5]'ताच्छील्ये चानश्'। [अधिपत्नी] अधि-अधिकस्य पत्युः

---

[1] वि. पु. १-९-१०६. [2] भा. व.

[3] वि. पु. १-९-११९. त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी ।
सन्ध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥

[4] ,, १-९-१२०. यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥

[5] अष्टा. ३-२-१२९.

भगवतः पत्नी । [1]'पत्युर्नो यज्ञसंयोगे' इति पाणिनिः । आश्रित-संरक्षणयज्ञे सहधर्मचारिणी; सृष्ट्यादीनामप्युपलक्षणम् । तथा चोभय-संकल्पायत्ता जगन्निर्माणादिलीलेति भावः ॥

अन्यदपि **श्रद्धासूक्तम्** — [2]'श्रद्धयाऽग्निस्समिध्यत' इत्यादि 'हविषा वर्धयामसि' इत्यन्तम् ॥

तत्र श्रद्धासूक्ते 'श्रद्धां देवा यजमानः' इत्यादिना सर्वदेवो-पास्यत्वमवगतम् । 'देव' इति मनुष्याणामुपलक्षणम् ।

'श्रद्धां प्रातर्हवामहे' इत्यादिना सन्ध्यात्रयोपास्यत्वम् । 'श्रद्धा देवानधिवस्त' इत्यनेन सर्वदेवान्तर्यामित्वं; 'श्रद्धा विश्वमिदं जगत्' इत्य नेन सामानाधिकरण्यव्यपदेशेन शरीरात्मभावश्च सिद्धः । यथा [3]'नारा-यण एवेदं सर्व'मिति भगवतः । [4]'सर्वं खल्विदं ब्रह्म' इति सामा-

---

[1] अष्टा. ४-१-३३.

[2] यजु. अष्ट. २-प्रश्न. ८ अनु.८, ६४-६६.
श्रद्धयाऽग्निः समिध्यते श्रद्धया विन्दते हविः । श्रद्धां भगस्य मूर्धनि वचसाऽऽ-वेदयामसि । प्रियं श्रद्धे ददतः । प्रियं श्रद्धे दिदासतः । प्रियं भोजेषु यज्वसु इदं म उदितं कृधि । यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे ॥ एवं भोजेषु यज्वसु अस्माकमुदितं कृधि । श्रद्धां देवा यजमानाः वायुगोपा उपासते। श्रद्धां हृदय्ययाऽऽकूत्या श्रद्धया हूयते हविः । श्रद्धां प्रातर्हवामहे श्रद्धां मध्य-न्दिनं परि । श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेहमा । श्रद्धा देवानधिवस्ते श्रद्धा विश्वमिदं जगत् । श्रद्धां कामस्य मातरं हविषा वर्धयामसि ॥

[3] ना. उ.२-११. [4] छा. ३-१४-१.

नाधिकरण्यव्यपदेशस्तूभयसाधारणः। 'श्रद्धां कामस्य मातरमि'त्यनेन सर्वफलदातृत्वमवगतम्। एवं भूतां श्रद्धामुपास्महे॥

**मेधासूक्तेऽपि**

[1] मेधा देवी जुषमाणा न आगात्। विश्वाची भद्रा सुमनस्यमाना।
त्वया जुष्टा जुषमाणा दुरुक्तान्। बृहद्वदेम विदथे सुवीराः॥१॥
त्वया जुष्ट ऋषिर्भवति। देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया।
त्वया जुष्टश्चित्रं विन्दते वसु। सा नो जुषस्व द्रविणेन मेधे॥२॥

अस्मिन्मन्त्रद्वये देव्यास्सर्वव्यापित्वं, सर्वसमाराध्यत्वं, सर्वापेक्षितफलप्रदातृत्वं च सुस्पष्टमुच्यते।

मेधा देवीत्यादि—अध्यवसायिन्या बुद्धेर्निर्वाहिका [मेधा]। [देवी]-जगन्निर्माणनर्मरसिका। [नः]-तत्सेवारसिकानां अस्माकम्। [जुषमाणा] भक्तप्रिया। आगात्-अस्मद्यागं, [आगात्]-आगच्छतु। [विश्वाची] विश्वं भूतजातं अञ्जसा अञ्चन्ती व्याप्य नियच्छन्ती। लुप्तनकारादञ्चतेर्ङीप्। 'अन्चु गतिपूजनयो'रिति धातुना विश्वगता,विश्वपूज्या च। उक्तं च भगवता पराशरेण [2]'यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम' इति। [3]'त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरं' इति च। [भद्रा]-भजनीया; सर्वमंगळावहा। [सुमनस्यमाना]सुमनोभावमात्मन इच्छन्तीति क्यच्। क्यजन्तात् [4]'ताच्छील्ये चानश्' । तस्याः

[1] तै. उ. २-३७.
[2] वि. पु. १-८-१७.
[3] वि. पु. १-९-१२६.
[4] अष्टा. ३-२-१२९.

सुमनस्त्वे [1]'पापानां वा शुभानां वा ........ न कश्चिन्नापराध्यति' ॥ आगतां तां त्वंकृत्य ब्रवीति। त्वत्कटाक्षात्पूर्व [दुरुक्तान्]-दुरुक्तानि वचनलक्षणरहितानि वाक्यानि। [जुषमाणाः]-सेवमाना वयं; इदानीं [त्वया][जुष्टाः]-प्रीतिपूर्वकं समीक्षिताः। त्वत्कटाक्षपातेन [विदथे]-विज्ञाने सति, महान्तः विद्वद्गोष्ठीषु [सुवीरा]ः-वीर्यवन्तः। [बृहत्], महत्पूजितं वचः; [वदेम] अभिदधीमहि। अनेन मन्त्रेण लक्ष्मीकटाक्षाधीनं वाग्विलासादिकमिति दर्शितम् ॥

अथ द्वितीयः—'त्वया जुष्ट' इत्यादि। हे देवि, [त्वया जुष्टः] यः कश्चिदकिंचनोऽपि [ऋषिर्भवति]-मन्त्रद्रष्टा भवति। किं च त्वया जुष्टः ब्रह्मा भवति-बृहत्त्वगुणयोगी भवतीति यावत्। ब्रह्म वा भवति। [2]'निरञ्जनः परमं साम्यमुपैति' इति प्रक्रियया। ब्रह्मसदृशो भवति। किं च त्वत्कटाक्षतः गतश्रीरप्यागतश्रीर्भवति। [उत] अप्यर्थे। किं च त्वया जुष्टः, [चित्रं]-विस्मयनीयं, [वसु]-समृद्धधनं; [विन्दते]-लभते। एवं भूता सा त्वं [अस्मान्] त्वां प्रपन्नान्; [द्रविणेन] सर्वसमृद्ध्या सह [जुषस्व]-सेवस्व। हे [मेधे] हे लक्ष्मीरिति योजना। अनेन मन्त्रेण सर्वस्य ज्ञानधनमहत्त्वादिकं त्वदधीनमित्युक्तम् ॥

**अदितिसूक्तेषु**— [3]'अदितिर्द्यौरदितिरन्तरिक्षम्। अदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पञ्चजनाः। अदितिर्जातमदितिर्जे

---

[1] रा. यु. ११६-४४.
[2] मुण्डक. उ. ३-१-३.
[3] यजु. आर. प्र. १-१३-४.

नित्वं ।' 'अष्टौ पुत्रासो अदितेः' इत्यत्र अदितिशब्देन साक्षाल्लक्ष्मीः तद्विभूतिभूता भूमिर्वोच्यते ।

अदितिः-अखण्डनीयस्वरूपगुणविभवा अदितिः । 'दो अवखण्डने' । दितिर्नैत्यदितिः । [1]'द्यतिस्यती'त्यादिना इकारः । अनेन मन्त्रेण तस्याः सर्वात्मकत्वमुच्यते ।

'अदितिः पञ्चजना' इति पञ्चजनाश्चादितिविभूतिभूताः । के पुनस्ते? प्राणश्चक्षुःश्रोत्रान्नमनांसि । तथा वाजसनेयब्राह्मणे [2]'प्राणस्य प्राणं चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो मन इति' एते पञ्चजना अदित्यधीना इति यावत् । अदितिर्जातं-उत्पन्नम् । अदितिर्जनित्वं-जनुषो लक्षणं; जनिष्यमणामिति यावत् ।

[3]"अदितिर्देवा गन्धर्वा" इत्यादिकमनुवाकमदितिविभूतिप्रतिपादकमत्र लेख्यम् ।

[4]'अदितिर्न उरुष्यतु' इत्यादिसूक्तेऽपि तन्माहात्म्यं सुभिक्षम् । अन्यत्र लक्ष्मीमाहात्म्यपराणि वाक्यानि बहूनि दृश्यन्ते । [5]'अस्येशाना जगतो विष्णुपत्नी,' [6]'महीं देवीं विष्णुपत्नीमजूर्यां' [7]'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ,' [8]'सुमज्जानये विष्णवे ददाशती'ति ।

---

[1] अष्टा. ७-४-४०.
[2] वाजसे. ब्रा.
[3] तै. उ.
[4] तै. का. १ प्र. ५-५१.
[5] यजु. सं. ४. प्र. ४-१२.
[6] य. अष्ट. ३. अनु. २-१८-१.
[7] तै. आ. ३-१३-४१.
[8] य. अष्ट. २-४-२९-४.

**वाक्सूक्तं पृथिवीसूक्त**मित्यादिकमपि अत्र द्रष्टव्यम्। **वाक्सूक्ते** तु विशेषः [1]'मेधा श्रद्धा सरस्वती' इति सरस्वतीशब्दस्य लक्ष्मीनामत्वेन परिगणनात् तत्पर्यायवाक्छब्दवाच्याया लक्ष्म्या [2]'अनन्तामन्तादि'त्यनेन देशतः कालतो वस्तुतः परिच्छेदरहितत्वं। [3]'वाचं देवा उपजीवन्ति' इत्यादिना देवादिसर्वचेतनोपजीव्यत्वम्। [4]'वाचीमा विश्वे' त्यनेन सकलभुवनाधारत्वम्। '[इन्द्रपत्नी]'त्यनेन 'इदि परमैश्वर्ये' इति धातूत्पन्नेन्द्रशब्दवाच्यपरमैश्वर्यविशिष्टविष्णुपत्नीत्वम्। '[अमृतस्य नाभि]'रित्यनेन मुक्त्युपायत्वम्। '[अवन्ती देवी]'त्यनेन सर्वरक्षकत्वम्। '[यामृषय]'इत्यादिना सर्वोपास्यत्वं च सुस्पष्टमवगतम्।

**भूसूक्तेऽपि** तद्विभूतिभूतभूमिप्रतिपादके [5]'[इन्द्रपत्नी व्यापिनी]' इति सर्वव्यापित्वं भूम्या अवगतम्। तत् गुणतो व्याप्तिपरं :

[6]"तथा भूमिश्च नीला च शेषभूते मते मम।
स्वरूपतस्तु न तयोर्गुणतो व्याप्तिरिष्यते॥" इति

स्वरूपतो व्याप्तिप्रतिषेधात्, गुणतो व्याप्तिप्रतिपादनाच्च अनन्यथासिद्धैतद्वचनोपबृंहितस्वरूपतो व्याप्तिप्रतिषेधपरैकायनश्रुत्यैककण्ठ्यावश्यंभावाच्च। यद्यपि तैत्तिरीयके [1]"उद्धृताऽसि वराहेण'इत्यादिके भूविषये वाक्ये

---

[1] वि. पु. १-९-११९.
[2] य. अष्ट. २-८-६२-४.
[3] ,, ,, २-८-६२-७.
[4] ,, ,, २-८-६३:१-३.
[5] भूसूक्ते.
[6]
[7] तै. उ. २.

[1] 'ईश्वरीं सर्वभूतानां' इति सर्वभूतेश्वरत्वमवगतं, तथाऽपि जीवकोटित्वेन प्रमाणसिद्धायाः 'भूम्याः सर्वभूतेश्वरत्ववचनं तदन्तर्यामिलक्ष्मीपरत्वेन योज्यम् । वराहोद्धृतत्वं तत्परमेव । एतेषां सर्वेषामुपबृंहणानि वैष्णवब्राह्मभगवच्छास्त्रवचनानि ॥

तथा हि—मैत्रेयेण पृष्टो भगवान् पराशरः **वैष्णवे पुराणे** लक्ष्मीस्वरूपविभूत्यादिकं स्पष्टमध्यायद्वयेन प्रतिपादितवान् । तत्र प्रथमेंऽशेऽष्टमेध्याये **मैत्रेयः**

[2]"क्षीरोदाच्छ्रीः समुत्पन्ना श्रूयतेऽमृतमन्थने ।
भृगोः ख्यात्यां समुत्पन्नेत्येतदाह कथं भवान् ॥"

**पराशरः** [3] "नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी" इत्यारभ्य

[4]"देवतिर्यङ्मनुष्येषु पुन्नामा भगवान् हरिः ।
स्त्रीनाम्नी लक्ष्मीर्मैत्रेय नानयोर्विद्यते परम्" इत्यन्तं लेख्यम् ।

अनेनाध्यायेन सर्वेषां तत्वानां भगवानिव लक्ष्मीरपि व्यापनभरणनियमनात्मशरीरभावादिना सर्वेषामियं स्वामिनी, तानि सर्वाण्यस्याश्शेष इति सुस्पष्टमुदितम् ॥

अनन्तरेणाध्यायेन लक्ष्मीमाहात्म्यादिकं केनचिदितिहासेन प्रपञ्चितम् ।

---

[1] तै. उ. २.
[2] वि. पु. १-८-१६.
[3] वि. पु. १-८-१७.
[4] ,, ,, १-८-३५ (See appendix.)

**श्रीपराशरः** :—[1]" इदं च श्रृणु मैत्रेय यत्पृष्टोऽहमिह त्वया ।
श्रीसंबन्धं मयाप्येतच्छ्रुतमासीन्मरीचितः ॥ "

इत्यारभ्य, [2]"वसति न तेषु कदाचिदप्यलक्ष्मीः" इत्यन्तं सर्वं लेख्यम् ॥

अस्मिन्नध्याये साक्षात्सर्वेश्वरस्य परमात्मपरब्रह्मादिशब्दवाच्यस्य नारायणस्येव श्रद्धाविष्णुपत्नीश्रीशब्दवाच्यायाः सर्वेश्वर्याः सर्वात्मभूतायाः साक्षाल्लक्ष्म्याः अपि व्यापनभरणनियमनस्वाम्यादिकं अनन्तगरुडविष्वक्सेनादिनित्यसूरिविरिञ्चेशशतमखाद्यखिलसुरासुरमनुजसिद्धगन्धर्वादिस्तुतत्वं, तत्समाराध्यत्वं, अखिलहेयप्रत्यनीकत्वं, कल्याणैकतानत्वं, सर्वलोकस्य तत्कटाक्षलवसमुल्लसितत्वं, तस्य सर्वस्य तदभावमात्रविनाशित्वं, यज्ञदानतपःप्रभृतीनां धर्माणां तन्निदानभूतस्य सत्यस्य च तत्कार्यभूतशुद्धिसमृद्धिबुद्धिप्रभृतीनामपि तत्कटाक्षायत्तत्वं, सकलस्य चेतनस्य तेनैव भोगमोक्षरूपनिखिलपुरुषार्थलाभित्वं, अशरण्यशरण्यत्वमित्युक्तार्थजातं तदसाधारणमनन्यगोचरं प्रतिपादयता वसिष्ठपुलस्त्यवरप्रदानप्रसादीकृतदेवतापारमार्थ्यज्ञानेन श्रीविष्णुपुराणसन्दर्शितसर्वभोगापवर्गतदुपायरूपपरमरहस्येन भगवतः पाराशर्यस्य पितृत्वेन सर्वोपनिषत्सु घुष्यमाणेन साक्षाद्वसिष्ठपौत्रेण सकललोकपितामहचतुर्मुखनप्त्रा ब्रह्मविदग्रेसरशुकपितामहेन ब्रह्मविन्मैत्रेयाचार्येण भगवता पराशरेण, 'श्रीरेव सर्वेश्वरी' इति श्रुतीनामुपबृंहणं बहुभिस्तात्पर्यलिंगैः सुदृढय्य समुद्भावितम् ।

[1] वि. पु. १-९-१ (See appendix) [2] वि. पु. १-९-१४९.

एवमादिमे **ब्राह्मपुराणे** भगवान् हिरण्यगर्भः क्षीराब्धौ भगवन्तमभिगम्य "जितं ते" इत्यादिना स्तुत्वा, पृच्छति स्म—

**ब्रह्मोवाच**—"चतुर्दशविधस्यास्य भूतसर्गस्य केशव ।
परित्राणाय मे ब्रूहि रहस्यं परमाद्भुतम् ॥
दारिद्र्यनाशनं धर्म्यं मनोज्ञं पापनाशनं ।
सर्वेश्वर महाबुद्धे स्वरूपं वैभवं महत् ॥
श्रियस्सर्वातिशायिन्यास्तथा ज्ञानं च शाश्वतम् ।
नामानि चैव मुख्यानि यानि गौणानि चाच्युत ॥
त्वद्वक्त्रकमलोत्थानि श्रोतुमिच्छामि तत्वतः ।"

इति ब्रह्मणा पृष्टो भगवानाह :—

इति तस्य वचः श्रुत्वा प्रत्युवाच जगत्पतिः ।
महाविभूतेस्संपूर्णा षाड्गुण्यवपुषः प्रभोः ॥
मम सर्वात्मभूतस्य नित्यैवैषाऽनपायिनी ।
एकैव वर्तते भिन्ना ज्योत्स्नेव हिमदीधितेः ॥
सर्वशक्त्यात्मिका चैव विश्वं व्याप्य व्यवस्थिता ।
सर्वैश्वर्यगुणोपेता नित्यं तद्धर्मधर्मिणी ॥
प्राणशक्तिः परा ह्येषा सर्वेषां प्राणिनां भुवि ।
शक्तीनां चाऽपि सर्वासां योनिभूता परा कला ॥
हन्त तस्याः परं नाम्नां सहस्रमिदमुत्तमम् ।
शृणुष्वावहितो भूत्वा परमैश्वर्यभूतिदम् ॥

समस्तपापार्तिहरं सकलेष्टप्रदं सदा ।
देव्यास्संस्मृतिमात्रेण दारिद्र्यं याति भस्मसात् ॥
तथाऽष्टगुणमैश्वर्यं ददाति पठतां नृणाम् ।''

इति सर्वेश्वर्याः व्यापनभरणनियमनस्वाम्यादिकापरिमेयमाहात्म्यप्रमाणानि प्रपञ्चय , तन्नामानि स्वरूपरूपगुणविभूतिमाहात्म्यप्रतिपादकानि पठतां जपतां सर्वमङ्गलावहानि भोगमोक्षप्रदानि सहस्रनामानि व्यपदिश्यन्ते—

"इति नाम्नां सहस्रं तु लक्ष्म्याः प्रोक्तं शुभावहम् ।
परावरेण भेदेन गौणमुख्यविभागतः ॥
यश्चैतं कीर्तयेन्नित्यं शृणुयाद्वाऽपि पङ्कज ।
शुचिस्समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ॥
ऐहिकामुष्मिकां सिद्धिं लभते श्रीप्रसादतः ।
दारिद्र्यं नश्यते तस्य सर्वपापात् प्रमुच्यते ॥''

**सनत्कुमारसंहितायां** सनत्कुमारः—

श्रीनिवासं समभ्यर्च्य पुष्पधूपानुलेपनैः ।
भोज्यैश्च मधुपर्काद्यैः यथाशक्त्या जगद्गुरुम् ॥
तत्पार्श्वस्थां श्रियं देवीं संपूज्य श्रीधरप्रियाम् ।
ततो नामसहस्रेण तोषयेत् परमेश्वरीम् ॥
नामरत्नावलीस्तोत्रमिदं यस्सततं पठेत् ।
प्रसादाभिमुखी लक्ष्मीः सर्वमस्मै प्रयच्छति ॥

यस्माल्लक्ष्म्यंशसंभूताः शक्तयो विश्वगाः सदा ।
कारणत्वेन तिष्ठन्ति जगत्यस्मिंस्तदाश्रयाः ॥
तस्मात्प्रीता जगन्माता श्रीर्यस्याच्युतवल्लभा ।
स्वाध्यायशक्तयस्तस्य सिद्धिमिष्टां दिशन्ति च ॥
एक एव जगत्स्वामी शक्तिमानच्युतः प्रभुः ।
तदंशाः शक्तिमन्तोऽन्ये ब्रह्मेशानादयो यथा ॥
तथैवैका परा शक्तिः श्रीस्तस्य करुणाश्रया ।
ज्ञानादिषाड्गुण्यमयी या प्रोक्ता प्रकृतिः परा ॥
एकैव शक्तिः श्रीस्तस्य द्वितीया परिवर्तते ।
परावरेण रूपेण सर्वाकारात्ममानिनी ॥
अनन्तनामधेया च शक्तिचक्रस्य नायिका ।
जगच्चराचरमिदं विश्वं व्याप्य व्यवस्थिता ॥
तस्मादेकैव परमा श्रीर्ज्ञेया विश्वरूपिणी ।
सौम्या सौम्येन रूपेण संस्थिता वटबीजवत् ॥
यो यो जगति पुंभावः स विष्णुरिति निश्चयः ।
यो यस्तु नारीभावः स्यात्तत्र लक्ष्मीर्व्यवस्थिता ॥
प्रकृतेः पुरुषाच्चान्यस्तृतीयो नैव विद्यते ।
अथ किं बहुनोक्तेन नरनारीमयो हरिः ॥
अनेकभेदभिन्नस्तु क्रीडते परमेश्वरः ।
महाविभूतिदयितां ये स्तुवन्त्यच्युतप्रियाम् ॥

ते प्राप्नुवन्ति परमां लक्ष्मीं संशुद्धचेतसः ।
पद्मयोनिरिदं प्राप्य पठन् सूक्तं ततः क्रमात् ॥
दिव्यं चाष्टगुणैश्वर्यं तत्प्रसादाच्च लब्धवान् ॥ '' इति ॥

अत्राऽपि तस्य स्वरूपरूपगुणविभवादिकं शक्तिचक्रनायिकात्वं, भगवतः सर्वेश्वरस्यैव सर्वव्यापनभरणनियमनादिकं सुस्पष्टं प्रपंच्योपसंहृतम् । श्रीमद्वैष्णवपुराणवदत्राप्यस्मदपेक्षितं सुभिक्षम् ॥

**लैंगे क्षुपस्तोत्रे**—" प्रजया तस्य सन्तुष्टो भगवान्पुरुषोत्तमः ।
श्रीभूमिसहितः श्रीमान् शंखचक्रगदाधरः ॥ ''

अत्रापि लक्ष्मीनारायणयोरपरिमेयमाहात्म्यं सुप्रसिद्धम् ॥

**श्रीविष्णुस्मृतौ** श्रियं प्रति वसुधावचनम् —

"आक्रम्य सर्वां तु यथा त्रिलोकीं तिष्ठत्ययं देववरोऽसिताक्षि* ।
तथा स्थिता त्वं वरदे तथाऽपि पृच्छाम्यहं ते वसतिं विभूत्याः॥ ''[1]

**श्रीरुवाच** :—

" सदा हिताऽहं मधुसूदनस्य देवस्य पार्श्वे तपनीयवर्णा ।
†अस्मि स्थिता यं मनसा स्मरामि श्रिया युक्तं तं प्रवदन्ति सन्तः॥''[2]

**स्वायंभुवे** :—" सर्वकामप्रदां रम्यां संसारार्णवतारिणीम् ।
क्षिप्रप्रसादिनीं लक्ष्मीं शरण्यामनुचिन्तयेत् ॥ ''

अत्रापि भोगमोक्षप्रदातृत्वेन तत्साधनत्वं च देव्याः प्रतिपादितम् । एवमन्यत्र सर्वश्रुतिस्मृतीतिहासपुराणेषु सर्वेश्वरस्य श्रियःपतेः पुरुषो-

---

[1] वि. स्मृ. ९८. ६. [2] वि. स्मृ. ९८. ८. * असिताङ्गे – पा.
† अस्याज्ञया यं मनसा स्मरामि श्रिया युतं ........... ॥ – पा.

त्तमस्य जगत्कारणत्वादिकं सर्वज्ञत्वसर्वशक्तित्वादिकं हेयप्रत्यनीकत्व-कल्याणगुणाकरत्वादिकं च सर्वं सर्वेश्वर्या जगन्नायिकाया अपि साधारणम् । एवं श्रुतिस्मृत्यादिषु प्रतिपाद्यमानानां लक्ष्मीस्वरूपरूपगुण-विभवादीनां सामस्त्यं श्रीसूक्ते दरीदृश्यते ॥

हिरण्यगर्भः श्रीपुत्रः श्रीसूक्तस्य ऋषिः स्मृतः ।
देवता सैव विज्ञेया छन्दश्चात्र निगद्यते ॥
चतुर्थी पञ्चमी चात्र त्रिष्टुभौ छन्दसा स्मृतौ ।
शिष्टा अनुष्टुभश्चेति छन्दस्तत्त्वविदो विदुः ॥
अन्त्यां तृतीयां बृहतीं केचिदिच्छन्ति पण्डिताः ॥

अथवा—श्रीसूक्तस्य श्रियं देवीं भूषितां चैव देवताम् ।
अन्ये वदन्ति मुनयः छन्दःक्लप्तिं च पूर्ववत् ॥

कुत्रास्य विनियोगः ? भोगमोक्षार्थिनां तेन श्रीसूक्तेन विधीयते ।
आराधने श्रियो देव्याः श्रीकामानां जपादिषु ।
बोधायनेन मुनिना सूत्रे च विनियुज्यते ॥

**तत्र तावद्बोधायनः** :—'अथातः श्रीसूक्तकल्पं व्याख्यास्यामः । चान्द्रायणं चरित्वा सहस्रं जपेत् सिद्धो भवतीत्यथ पुष्टिकाम उत्तर-फल्गुन्यां पञ्चमीयोगे केवलायां वोपोषितो महाव्रीहितण्डुलैश्चरुं पयसि श्रपयित्वा बिल्वमयं परिधिं परिधाय बिल्मयमिध्मं आदध्यात् । अथ पायसादवदायाभिघार्य प्रत्यृचं दशाहुतीर्जुहोति आज्याहुतीस्समिदाहु-तीश्च 'गन्धद्वारा'मित्यारभ्याऽऽन्तात्सूक्तस्य पद्मानि जुहुयात् । त्रयः प्रां-चस्त्रय प्रत्यञ्च आत्मा सप्तमो महाश्रीर्भवति' इत्याह भगवान् बोधायनः।

**वसिष्ठस्मृतौ** : —[1]'अथ लक्ष्मीव्रतं वक्ष्ये । पञ्चम्यां शुक्लपक्षस्य चैत्रे मासि प्रदोषेऽविनालं सितमष्टदलपद्मं लिखित्वा, तत्र श्रियमावाह्याऽऽवाहनादिविसर्जनान्तं कृत्वा, समिदाहुतीश्च प्रत्यृचं अष्टाविंशतिं हुत्वा, श्रीसूक्तं जपित्वा ततः शेषं भुञ्जीत । सम्वत्सरान्महती श्रीर्भवति, अलक्ष्मीनाशश्च भवति ॥' इति ॥

**पाद्मे पुराणे** : [2]" लक्ष्मीसमाराधने विनियोगः ।

मल्लिकैः श्वेतपद्मैर्वा जातिपुष्पैरथापि वा ।
मन्दारकुसुमं चापि पूजायां गृह्यते श्रियः ॥
आद्ययाऽऽवाहयेत् देवीं श्रीसूक्तस्य नृपेश्वरीम् ।
द्वितीययाऽऽसनं दद्यात् पाद्यं चैव तृतीयया ॥
चतुर्थ्याऽर्घ्यप्रदानं स्यात् पंचम्याऽऽचमनीयकम् ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ॥
मुक्तासंवीतमष्टम्या भूषणानि च पार्थिव ।
गन्धं दद्यान्नवम्या तु दशम्या पुष्पमेव च ॥
एकादश्या तथा धूपं द्वादश्या ज्योतिरेव च ।
पायसं घृतसंयुक्तं खण्डशर्करसंयुतम् ॥
निवेदयेत् त्रयोदश्या चतुर्दश्या प्रदक्षिणम् ।
उद्वासयेत् पञ्चदश्या लक्ष्मीं तां लोकमातरम् ॥
स्नाने वस्त्रे निवेद्ये च दद्यादाचमनं नृप ।
कृत्वा प्रदक्षिणं देवीं प्रागुद्वासनकर्मणः ॥

---

[1] वसिष्ठस्मृ. [2] पाद्मपु.

अग्रतोऽग्निं समाधाय समूह्य यस्य संस्कृतिम् ।
कृत्वाऽग्निं परिषिच्याथ जुहुयादाज्यसंप्लुतम् ॥
सूक्तस्य प्रत्यृचं देव्याः स्वाहान्तं प्रणवादिकम् ।
समिधं बिल्ववृक्षस्य पालाशं च तथैव च ॥
आज्याहुतिं तथा कृत्वा परिषिच्य तथैव च ।
अष्टाविंशतिकृत्वोऽथ जपन् सूक्तं श्रियं स्मरेत् ॥
सर्वदा प्रणवं दद्यादादौ सूक्तस्य पार्थिव ॥ ''

**स्मृत्यन्तरेषु** [1]'' श्रियः पंचदशर्चं तु श्रीकामस्सततं जपेत् । ''

**पुराणान्तरेषु** [2]'' यः श्रीसूक्तं जपेन्नित्यं ऋग्भिस्तामर्चयेच्छ्रियम् ।
श्रीकामो जुहुयादग्नौ पद्मैर्बिल्वैस्तथा फलैः ॥ ''

विनियोगादीनां ज्ञातव्यत्वे प्रमाणम्—

[3]'' अविदित्वा *ऋषिं छन्दो दैवतं योगमेव च ।
योऽध्यापयेद्याजयेद्वा पापीयान् जायते तु सः ॥ '' इति ।

[4]†''यो ह वा अविदितार्षेयछन्दोदैवतब्राह्मणेन मन्त्रेण यजति याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वाऽऽपद्यते प्र वा मीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति । अथ यो ‡मन्त्रे वेद स सर्वमायुरेति अयातयामान्यस्य छन्दांसि भवन्ति''इति । तथाऽर्थज्ञानाज्ञाने च

1 2 3 4

* ऋषिच्छन्दोदेवतायोगमेव च–क, ख. † यो वा अवि.–क. अथवाविदि. ख.
‡ मन्त्रं–क.

फलविशेषमाहुः । [1]"स्थाणुरयं भारवाहः किलाधीत्य वेदं न विजानाति योऽर्थं, योऽर्थज्ञ* इत् सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा" इति अनवगतार्थज्ञानस्य मन्त्रस्य सर्वमन्त्रवैयर्थ्यम् ; अवगतार्थज्ञानस्य सर्वपुरुषार्थसाधकत्वं श्रुतम् । तस्मादवश्यं सूक्तादीनामर्थज्ञानं संपादनीयम् । तज्ज्ञानार्थमिदमपि सूक्तं व्याकुर्महे ॥

**हरिः ओं ॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।**
**चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥**

सर्वेश्वरेश्वरी लक्ष्मीर्भोगमोक्षप्रदायिनी ।
आद्ययाऽऽवाह्यते देवी श्रीनिवासाद्धरिप्रिया ॥

**हिरण्यवर्णां** इत्यादि । हे **जातवेदः** -लक्ष्मीपते ; **जातं**-स्वतस्सिद्धं **वेदः**- धनं वा, ज्ञानं वा, यशो वा, यस्य जातवेदाः । स्वतस्सिद्धं सार्वज्ञ्यसर्वैश्वर्यादिकं साक्षाल्लक्ष्मीपतेरेव, नान्यस्य कस्यचित्। अग्न्यादित्यसोमसूर्यशिववैश्रवणचतुर्मुखशतमखादीनां ज्ञानबलैश्वर्य - वीर्यादिकं स्वपदलाभादिकं च भगवदायत्तमिति सर्वैः शास्त्रैः समर्थ्यते॥

तथा हि—चतुर्मुखस्य तावत् **महाभारते** :—

[2]"युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः ।
पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम ॥ "

---

1 [2] भार. (?) (इतिहा. समु. १३-८) * अर्थज्ञः सकलं-क, ख.

**शिवस्य राजधर्मे** : [1]"महादेवः सर्वमेधे महात्मा
हुत्वाऽऽत्मानं देवदेवो बभूव ।
विश्वाँल्लोकान् व्याप्य विष्टभ्य कीर्त्या
विराजते द्युतिमान् कृत्तिवासाः ॥ "

शतमखस्य **वैष्णवपुराणे** :—
[2] "इष्ट्वायमिन्द्रो यज्ञानां शतेनामरराजताम् ।
अवाप तमनन्तादिमहं द्रक्ष्यामि चक्रिणम् ॥"

**अग्न्यादित्यसोमानाम्** :– [3]"तेजोदास्त्वमस्यग्नेर्वर्चोदाः त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रस्य" इत्यादिश्रुतेः । पुनरत्रैव : [4]"अग्निं वै जातं पाप्मा जग्राह तं देवा आहुतीभिः पाप्मानमपाघ्नन्" [5]" त्रिते देवा अमृजतैतदेनः । त्रित एतन्मनुष्येषु मामृजे" [6]"भीषाऽस्माद्वातः पवत" इत्यादि । यमस्य :–

[7]"अहममरवरार्चितेन धात्रा सम इति *लोकहिताहिते नियुक्तः ।
हरिगुरुवशगोऽसि न स्वतन्त्रः प्रभवति संयमने ममापि विष्णुः ॥ "

सर्वेषां लोकपालानां **काश्यपीये** :—
[8] "ब्रह्माद्याश्च सुराः सर्वे मुनयश्च तपोधनाः ।
एधन्ते त्वत्पदच्छायामाश्रित्य कमलेश्वरि ॥ " इति ।

---

[1] भार. शा. २०-१२. [2] वि. पु. ५-१७-७. [3] तै. उ. २-६३.
[4] तै. आर.२-१५. [5] तै. ब्रा. ३-७-१२. [6] तै. उ.१-१३.
[7] वि. पु. ३-७-१५. [8] काश्यपीये. * लोकहिते–ख.

**ब्राह्मे पुराणे** :—[1]"एक एव जगत्स्वामी शक्तिमानच्युतः प्रभुः ।
तदंशाः शक्तिमन्तोऽन्ये ब्रह्मेशानादयो यथा ॥"

**मंकणसंहितायां** :—

[2] "श्यामः किरीटी देवेशो वज्रभृद्विश्वनन्दनः ।
श्रीपूजानिरतो भोगी योऽसौ पुष्णातु मे श्रियम् ॥
वह्निर्विश्वभुगत्युग्रः शक्तिर्देवमुखो विभुः ।
पद्मापादार्चनपरः रक्तः पुष्णातु मे श्रियम् ॥
गारुत्मतनिभः पाशी वरुणो यादसां पतिः ।
सुधासूक्तयर्चनपरः स्निग्धः पुष्णातु मे श्रियम् ॥
प्रवर्तयति लोकांस्त्रीन् जीवयत्यपि मारुतः ।
ख्यातिजाराधनपरः प्रीतः पुष्णातु मे श्रियम् ॥
उत्पत्तिस्थितिकृत्सोमस्सुधाधारो गदी वली ।
इन्दिराराधनपरः श्वेतः पुष्णातु मे श्रियम् ॥
शुद्धस्फटिकसंकाशः शूली लोकैकनायकः ।
विष्णुदेव्यर्चनपरः हरः पुष्णातु मे श्रियम् ॥"

**महालक्ष्मीसंहितायाम्** :—

[3] "सामर्ग्यजुर्मयीं देवीं देवगर्भां मनस्विनीम् ।
लोकेशेशविभूतीनां कारणं यन्निरीक्षणम् ॥" इति

---

[1] ब्राह्म. [2] मंकणसं. [3] महालक्ष्मीसं.

भगवद्व्यतिरिक्तानां सर्वेषां देवानां स्वरूपरूपगुणविभवादिकं भगवदधीनमिति प्रपञ्चितम् । तस्मादत्र 'जातवेदः'शब्दः सर्वनिर्वाहकस्य श्रियःपतेर्वाचक इति । **परमात्मसूक्ते** 'जातवेदः'शब्दः परमात्मनि प्रयुज्यते । [1]"जातवेदसे सुनवाम सोमं" इति । परमात्मन्निप्रयुक्तानामेवंविधानां शब्दानां रूढिमपहाय योगेनैव तद्वाचकत्वं भगवता शारीरकमीमांसासूत्रकारेण बादरायणेन [2] "आकाशस्तल्लिंगात्" [3]"प्राणस्तथानुगमात्" [4]" वैश्वानरस्साधारणशब्दविशेषात्" इत्यादिसूत्रैः सुदृढेन न्यायेन निरूप्य निर्णीतम् ॥

**हिरण्यवर्णाम्**—हितरमणीयाम् । हितत्वं नाम अपेक्षितार्थसाधकत्वं; रमणीयत्वं नाम प्रीत्यनुरूपत्वम् । सर्वहितत्वरमणीयत्वाभ्यां देव्या दिव्यरूपमेव परमप्राप्यं *परमप्रापकमिति च दर्शितम् ।

तथा† **धनदीये** [5]"सर्वलक्षणसंपन्नां श्रियं श्रेयःप्रदायिनीम् ।
क्षिप्रप्रसादिनीं देवीं शरण्यामनुचिन्तयेत् ॥

**वैष्णवपुराणे**[6] "ततः स्फुरत्कान्तिमती विकासिकमले स्थिता ।
श्रीर्देवी पयसस्तस्मादुत्थिता धृतपङ्कजा ॥"

**हरिणीं**—सर्वपापहरणशीलाम् । 'ताच्छील्ये णिनिः' । वृद्ध्यभावः छान्दसः । [7] "पापहारिणी" इति तस्या नामसु पठ्यते ।

---

[1] तै.उ. २-२-११. [2] शा. सूत्र. १-१-२३. [3] शा. सूत्र. १-१-२९.
[4] शा. सूत्र. १-२-२५. [5] धनदीय. [6] वि. पु. १-९-१००.
[7] लक्ष्मीसहस्रना. * प्रापकमिति–क. † नारदीये–ग.

**काश्यपीये** [1]"सर्वदुःखौषधं नृणां सर्वपापक्षयप्रदाम् ।"
**वैष्णवे** [2]"त्वं सिद्धिस्त्वं स्वधा स्वाहा" इति । अथवा **हरिणी**– कृष्णमृगी । [3] "सा मेध्या सर्वयागार्हा सर्वपापहराऽपि च" । भगवत्समाश्रयणयोग्यतापादिनीति यावत् ।

**काश्यपीये** [4]"नारायणात्मिकां देवीं श्रियं त्रैलोक्यमातरम् ।
भजमानां महाभाग परमो धर्म उच्यत ॥" इति ।

**सुवर्णरजतस्रजाम्**— स्वसौन्दर्यलावण्यानुगुणनित्यनिर्मलविराजमान-स्रग्वस्त्राभरणोद्भासिताम् । **श्रीविष्णुपुराणे** : [5] "स्रग्वस्त्राभरणैर्युक्ता दिव्यमाल्यांबरधरा । ++++ ययौ वक्षःस्थलं हरेः ॥" तद्ध्याने च [6] "सुवर्णरजतां मालां धारिणीं सुमुखीं सदा" इति । **चन्द्राम्**— सर्वाह्लादकारिणीम् । 'चदि आह्लादने' । इदित्वान्नुम् । औणादिको र[*क्]प्रत्ययः । तापत्रयतप्तान् स्वसमाश्रयणोन्मुखानाह्लादयन्तीम् ।

तथा– [7] "शुद्धस्फटिकसंकाशां चन्द्रायुतसमप्रभाम् ।
लावण्यामृततोयेन सिञ्चन्तीं शोभनाननाम् ॥"
'नमामि चन्द्रनिलयां चन्द्रां चन्द्रसहोदरीम् ।
चतुर्भुजां चन्द्ररूपामिन्दिरामिन्दुशीतलां ॥
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम् ॥"

---

[1] काश्य. [2] वि. पु. १-९-११९. [3] [4] काश्य.
[5] वि. पु. १-९-१०५. [6] [7] [8] लक्ष्म्यष्टोत्तरे.

[1] "ततोऽवलोकिता देवा हरिवक्षःस्थलस्थया ।
लक्ष्म्या मैत्रेय सहसा परां निर्वृतिमागताः ॥ "

*तथा [2] "पूर्वकर्मानलार्तानां ध्यायिनां खेदशान्तये ।
स्ववक्त्रेन्दुकलोत्थेन ह्लादयन् गोगणेन तु ॥ " इति ।

**हिरण्मयीम्**–हिरण्यादिसर्वधनप्रचुरां । "वामहस्तवसुप्रदां" इति तद्ध्याने । [3] "वसुधारामुदारां च हरिणीं वसुवर्षिणीम् ।
धनधान्यकरीं सिद्धिं वसुधां वसुधारिणीम् ॥
निधिद्वयेनापि धनं प्रापयन्तीं मनोरथान् ॥ "

तथा : [3] "शंखपद्मनिधी लक्ष्म्याः पादयोरग्रतः स्थितौ ।
पश्यन्तौ मुखमन्योऽन्यं वमन्तौ विपुलं धनम् ॥ "

**लक्ष्मीम्**–सर्वसुरासुरमनुजमुनीन्द्रादिभिर्लक्षणीयां–प्रार्थनीयां; सर्वैश्वर्यनिमित्तभूतदिव्यलक्षणसंपन्नां वा ।

तथा : [4] "ब्रह्माद्यास्सकला देवा मुनयश्च तपोधनाः ।
त्वां स्तोतुमपि नेशानास्त्वत्प्रसादलवं विना ॥" इति ।

**जातवेदो म आवह**–एवं भूतां तां लक्ष्मीं त्वत्समाश्रयणोन्मुखस्य सर्वोपकरणसमृद्ध्यर्थं, **आवह**—सन्निधापय । लक्ष्मीनिरीक्षणादेव सर्वेषां सर्वसमृद्धिः । यथा [5] "सः श्लाघ्यस्सगुणी धन्य" इत्यादि, [5] "देवि निरीक्षस" †इत्यन्तं; [6]"दाराः पुत्रास्तथाऽऽगारा" इत्यादि च ॥ १॥

---

[1] वि. पु. १-९-१०६. [2] सात्वते. [3] [4]

[5] वि. पु. १-९-१३१. [6] * तथा इति न-क. † इति-ख.

पूर्वेणावाहितां लक्ष्मीं सर्वमङ्गलदायिनीम् ।
अनन्यगामिनीं नित्यां द्वितीयेन नियच्छति ॥

**तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।**
**यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥**

**हे जातवेदः**—स्वयंसिद्धसर्वसमृद्धे लक्ष्मीपते । भगवतः सर्वसमृद्धिः स्वयं सिद्धेति सर्वशास्त्रप्रसिद्धा । यथा—

[1] "नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्येशे कश्चन तस्य नाम महद्यशः ॥ "

[2] "पतिं विश्वस्याऽऽत्मेश्वरं," "नान्यो हेतुर्विद्यत ईशनाय" । एतासामुपबृंहणम् [4] "कालस्य हि च मृत्योश्च जंगमस्थावरस्य च ।
ईशते भगवानेकः सत्यमेतद्ब्रवीमि ते ॥ "

इत्यादि । **तां**—पूर्वोक्तसमस्तकल्याणगुणगणप्रकाराम्* । **लक्ष्मीं**—चतुर्मुखशतमखादिसकलसुरासुरप्रार्थनीयविभवलक्षणाम् ; [5] " सर्वलक्षणसंपन्नाम्," [6] "न ते वर्णयितुं शक्या" इत्यादि । भवदावानलप्लुष्टतया त्वत्कटाक्षामृततरङ्गिणीतरङ्गपरम्पराप्लाव्यमानस्य **मे**—मत्सेवार्थं । **इहावह**-मयि सन्निधापय । कथमित्यपेक्षायां **अनपगामिनीम्**-मत्समीपादन्यत्र कदाचित् क्वचिद्गन्तुं नेच्छन्तीं; यथा मयि नित्यानपायिनी, तथा कुरु । तथा [7] "आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः"

---

[1] तै. उ. २-१. [2] तै. उ. नारा. २-११. [3] * प्रकारां तां—ख. ग.
[4] भार. उ. ६७-१३. [5] [6] [7] तै. उ. १-४.

चीरं कुर्वाणा। **यस्याम्**--सकलापेक्षितप्रदातृत्वेन श्रुतिस्मृतिसिद्धायां ; यथा [1]"स श्लाघ्यस्सगुणी धन्य" इत्यादि। **हिरण्यम्**—हिरण्यरूप्यादि *आकूप्यं धनजातम्। **गाम्**—गोमहिषादिजीवधनम्। **अश्वम्**— †रथ-गजतुरगादिवाहनसमृद्धिम्। **पुरुषान्**—दासीदासादिपरिचारकान् सर्वै-र्विभवैर्विहीनोऽहम्। **विन्देयम्**—सर्वां विभूतिं लभेयमिति। तथा [2]"वासांसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह। लोमशां पशुभिस्सह स्वाहा" इति।

**स्वायंभुवे** :— "यद्यत्कामयते बुद्ध्या यद्यद्दृष्ट्वा च याचति।
तत्तदेतेन बीजेन स्वयमेवागमिष्यति॥" ॥२॥

‡जगत्सर्गस्थितिध्वंसव्यापनादिषु कर्मसु।
स्वप्रेयांसं तृतीयेन क्रीडन्तमनुधावतीम्॥

आह्वयति इति शेषः।

**अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।**
**श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥ ३॥**

**अश्वपूर्वां**-व्यापनभरणनियमनादिजगद्व्यापारेषु, अश्वः-व्यापनशीलो भगवान् यस्याः §पूर्वप्रदेशे, सा अश्वपूर्वा ताम्। 'अशू व्याप्तौ' अश्वशब्द[*:]व्याप्तिकर्मणः अश्नोतेरौणादिकः क्वन्तः।

---

[1] वि.पु. १-९-१३१. [2] तै. उ.१-४. [3]स्वायंभुवे. * कनकजातं-ख.
† गजरथ-क. ‡ जगज्जन्म-ख. § पूर्वप्रादेशिकः। अशू व्याप्तौ-ख.

[1] "यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम " इति ।

**रथमध्यां**—रथानां–ईहाशीलानां* जीवानां, **मध्ये**—हृदयगुहायां आत्मत्वेन या तिष्ठति सा **रथमध्या** । यद्वा, रथस्य–शरीरस्य, श्रीनिवासस्य सर्वेश्वरस्य सौन्दर्यलावण्याद्याकाराप्राकृतपञ्चशक्तिमयदिव्यविग्रहस्य; [2]"आत्मानं रथिनं विद्धि शरीरं रथमेव च" इति श्रुतिप्रसिद्धेः । तस्य मरकतगिरितटविशाले श्रीवत्सकौस्तुभादिकल्पिताकल्पे मङ्गलाकारे वक्षःस्थले नित्यसन्निहिता । तथा – [3]"पश्यतां सर्वदेवानां ययौ वक्षःस्थलं हरेः" इति । **हस्तिनादप्रबोधिनीम्**—गजेन्द्राद्याश्रितार्तनादे परमकृपाम्बुधेः सर्वेश्वरादपि प्रथमप्रबोधनशीलाम् ; आर्तसंरक्षणे पुरुषोत्तमादपि त्वरमाणाम् इति यावत् । [4] "करुणास्रानतमुखी" "सर्वार्तिसमुद्रपरिशोषिणी" इति‡ तन्नाम्नि ॥

§पूर्वार्धस्यैवं[वा]योजना । **अश्वपूर्वाम्**—यस्याः प्रयाणकाले सेनाग्रे असंख्येयान्यश्ववृन्दानि पुरस्ताद्गच्छन्ति तां **अश्वपूर्वाम्** । **रथमध्याम्**—यस्यास्सेनामध्ये मणिमयानि दिव्यानि रथकदंबानि सन्निहितानि भवन्ति तां, **रथमध्याम्** । **हस्तिनादप्रबोधिनीम्**—पद्मवनवासित्वात् पद्मप्रियाणां गजानां नादैः प्रबुद्ध्यमानाम् । यद्वा—स्वासनपद्मस्थगुल्गुलु

---

[1] वि. पु. १-८-१७. [2] कठ. ३-३. [3] वि. पु. १-९-१०५. [4] लक्ष्मी-सहस्रनामाध्याये-करुणाम्रानतमुखी.-इति पाठः । करुणार्द्रानतमुखी–ग. *रथानामिह क.-महाशीलानां ग. रहणशीलानां-घ ॥ ‡तन्नामानि–ख. तन्नामनी–ग.
§ पूर्ववत् अस्यैवं वा योजना । अश्वपूर्वा--अश्वाः पूर्वाः यस्यां प्रयाणकाले–ख

कुरण्डदमकशलिलानां* तद्भक्तानां निनादैरहरहः प्रबुद्ध्यमानाम् ।
**तथा मङ्कणसंहितायाम्**—

[1]"आग्नेयादिदलस्थास्ते गुल्गुलुश्च कुरण्डकः ।
दमकः शलिलश्चेति ख्याताः पुष्णन्तु मे श्रियम् ॥"

**काश्यपीये**—[2]"ऐरावतादिभिः सम्यक् सामजैरावृतां† शुभाम् ।"
**स्वायंभुवे** —[3]"‡कोणपत्रगतैर्दिव्यैर्हिरण्यकलशोदकैः ।
संप्रीतैः स्नाप्यमानां तां बोध्यमानां च तैर्गजैः॥"इति ।

**श्रियम्**—भगवद्वक्षःस्थलैकाश्रयाम् । **देवीम्**—जगत्सृष्ट्यादिकर्मनर्मविनोदैः स्वप्रेयांसं श्रीमन्तमनुक्रीडन्तीम् । **उपह्वये**—अनेन मन्त्रेण मम समीपं प्रापयामि । **सा श्रीः**—सर्वैराश्रयणीयाऽपि उपाश्रिता **मां** त्वदेकशरणम्, **देवी**—कन्तुकेनेव संकल्पमात्रोदञ्चनाकुञ्चनादिमता मया संक्रीडमाना । **जुषताम्**—अस्मल्लीलोपकरणमयमिति प्रीता भूयात् ॥

अपरस्मिन्मन्त्रे प्रायेण स्तोत्रात्मना सर्वमङ्गलावहानि देवीनामान्येव पठितानि ॥ **ब्राह्मे** नाममाहात्म्ये :— ब्रह्मा—

[4]"चतुर्दशविधस्यास्य भूतसर्गस्य केशव ।
परित्राणाय मे ब्रूहि रहस्यं परमाद्भुतम् ॥
दारिद्र्यनाशनं धर्म्यं मनोज्ञं पापनाशनम् ।
श्रियस्सर्वातिशायिन्याः तथा ज्ञानं च शाश्वतम् ॥

---

[1] मङ्कणसं. [2] काश्यपीये. [3] स्वायंभुवे. [4] ब्राह्मे. *शललिनाम्—क. ख.
† सामजैरर्चितां—ख. ‡ कोणपत्रगजैर्हेमकलशैरमृतोदकैः । संप्रीतैः तृप्यमानां—क.

नामानि चैव मुख्यानि यानि गौणानि चाच्युत ।
त्वद्वक्त्रकमलोत्थानि श्रोतुमिच्छामि तत्त्वतः ॥" इति

**हिरण्यगर्भेण पृष्टो भगवान्**:—

"देव्याः संस्मृतिमात्रेण दारिद्र्यं याति भस्मसात् ।
तथाऽष्टगुणमैश्वर्यं ददाति पठतां नृणाम् ॥" इति ॥ ॥ ३ ॥

संस्तूय नामभिर्दिव्यैः प्रसन्नां करुणाननाम् ॥
चतुर्थेन पुनर्देवीं सुस्मितां परिपश्यति ॥

**कां *सोस्मयां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीं ।**
**पद्मे स्थितां पद्मवर्णां त्वामिहोपह्वये श्रियम् ॥ ४ ॥**

**काम्**—सुखस्वरूपाम् । आनन्दमयस्य पुरुषोत्तमस्य आनन्दहेतुरियमिति हि शास्त्रप्रसिद्धिः । [1]"प्रिया तु सीता रामस्य दाराः पितृकृता इति ।
गुणाद्रूपगुणाच्चापि प्रीतिर्भूयोऽभ्यवर्धत ॥"

**नाममालायां**—[2]"नमामि भार्गवीं ख्यातिं सुखां सौम्यां सुखप्रदाम् ।" अथवा संसारसागरनिमग्नैः स्वोत्तारणाय प्रष्टव्यां **कां** । तथा [3]"कब्रमा का या सा सत्या" इति । ***सोस्मयाम्**—उत्स्मयसहिताम् । तकारलोपः छान्दसः । भगवत्संश्लेषजनितमहानन्दनिमग्नतया सर्वदा स्मयमानाम् ।

---

[1] रा. बा. ७७-२६. [2] नाममाला. [3] तै. उप. २-२१.

* सोस्मितां—ख. ग.

**भविष्योत्तरे**–[1] "उत्संगे देवदेवस्य चिन्तयेत्सततं स्थिताम् ।
विद्रुमाधरबिम्बां तां कुन्दकोरकदन्तकाम्† ॥
शंखचक्रधरां देवीं *हेमाभां सुस्मितानननाम् ।"

**धनदीये**– "सुस्मितास्योत्पलोद्भासिसुशुक्लदशनांशुभिः ।
नयन्मधुलिहः श्वैत्यमात्मगन्धानुपातिनः ॥"

**हिरण्यप्राकारां**–नानारत्नमयसुवर्णमयप्राकारपरिवृतानन्दमयदिव्यमण्डपान्तर्निवासिनीम् । तथा च श्रुतिः [3] "देवानां पूरयोध्या तस्यां हिरण्मयः कोशः स्वर्गो लोको ज्योतिषाऽऽवृतः" †इत्यादि । [4]"यं मृत्युर्नावपश्यति तं प्रपद्ये" इति च । **मङ्कणसंहितायाम्**

[5] "माहेन्द्रमण्डपं हेमसालगोपुरलक्षणम् ।
चतुर्द्वारं महद्दीप्तं यत्तत्पुष्णातु मे श्रियम् ॥"

**आर्द्राम्**–दयार्द्रहृदयाम् । स्वचरणांभोजसमाराधनार्थं दिग्गजेन्द्रैरमृतकलशैः स्नाप्यमानतया आर्द्रदेहां वा । **ईश्वरसंहितायाम्** :—

[6] "दिग्गजेन्द्रैः स्नाप्यमानां काञ्चनैः कलशोदकैः ।"

**ज्वलन्तीम्**–लावण्यमयेन स्वतेजसा सर्वांल्लोकान् भासयन्तीम् ।

[7] "ज्वलन्तीं तेजसा स्वेन सा मे देवी प्रसीदतु ॥"

**भविष्योत्तरे** :— [8]"‡भाभासितदिशाभोगां साक्षाद्भानोः प्रभामिव ।
सहस्रादित्यसङ्काशां सहस्रेन्दुनिभाननाम् ॥"

---

[1] भविष्योत्तरे. †सद्द्विजां–ख. [2] धनदीये. [3] तै. आर. १-२७-११६.
[4] तै. आर. २-१९-१. [5] मङ्कणसं. [6] ईश्वरसं. [7] [8] भविष्योत्तरे.
* श्यामाभां–क. † इत्यादि । चतुर्जालं ब्रह्मकोशं यं मृत्युः–ख. ‡ स्वभासित–ग.

'ज्वलन्तीं' इत्यस्याः 'आर्द्रां' इति विशेषणं वा । [1]"आर्द्रं ज्वलति ज्योतिरहमस्मि" इति श्रुत्या 'आर्द्रां' इति ज्वलतेर्विशेषणमाम्नातम् । **तृप्ताम्**–भगवत्संश्लेषजनितेन महानन्देन स्वयं तृप्ताम् । **तर्पयन्तीम्**–कान्तिशान्त्याकरमधुरशीतलविलोकनामृततरङ्गपरंपरया तापत्रयतप्तं प्राणिजातमाह्लादयन्तीम् ।

**सात्वते**–[2]"पूर्वकर्मानलार्तानां ध्यायिनां खेदशान्तये ।
स्ववक्त्रेन्दुचयोत्थेन ह्लादयन्गोगणेन तु ॥" इति ।

तथा **पद्मे स्थिताम्**-स्वसौन्दर्यसौकुमार्यानुगुणसुगन्धशीतलसुखस्पर्शपद्मासनासीनाम्; **पद्मवर्णाम्**-पद्मोदरसहोदराम्; अशेषजनवर्णनीयलावण्यमयदिव्यशोभाम् । तथा **मङ्कणसंहितायाम्** :—

[3]"पद्मे स्थिता पद्मवर्णा पद्मनाभप्रिया शुभा ।
सदानुग्रहसंपन्ना सा मे देवी प्रसीदतु ॥"

**भविष्योत्तरे**:–[4]"पद्मालयां पद्महस्तां पद्मां पद्मदलेक्षणाम् ।" पूर्वोक्तसर्वगुणविशिष्टां **तां**-श्रियं, सर्वैः सर्वप्रकारैस्समाश्रयणीयां **इह**–तच्छेषतैकस्वरूपे मयि, **उपह्वये**–तदनुकूलाञ्जलिमुद्रादिभिरभिमुखीकरोमि ॥ ॥ ४ ॥

आहूतामागतां देवीं पञ्चमेन प्रपद्य ताम् ।
नाशं दुस्सहभार्याया अलक्ष्म्या वृणुते ततः ॥

---

[1] तै. उप. २. [2] सात्वते. [3] मङ्कणसं. [4] भविष्योत्तरे

**चन्द्रां प्रभासां यशसा ज्वलन्तीं**
**श्रियं लोके देवजुष्टामुदाराम् ।**
**तां[§]पद्मनेमिं शरणमहं प्रपद्येऽ-**
**लक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥**

*__चन्द्राम्__– ' चदि आह्लादने'; निरतिशयानन्दरूपामिति यावत् । आनन्दस्वरूपां, आनन्दगुणकां, आनन्दविग्रहां चेत्यर्थः । **प्रभासाम्**– प्रकृष्टतया भासमानाम् ; शुद्धसत्वप्रकाशशुभाश्रयदिव्यमङ्गलविग्रहाम् । यद्वा, **प्रभासां***–सर्वस्य लोकस्य सहस्रेन्दुसमप्रकाशाम् । †**यशसा**– देवस्य सर्वेश्वरस्य सहधर्मचारित्वेन सर्वलोकविदितेन गुणवत्त्वसौभाग्येन यशसा । **ज्वलन्तीम्**—अनुकूलाननुकूलास्वादतापकरदिव्यज्योतिः- स्वरूपाम् । तथा **मङ्कणसंहितायाम्**—

[1] " सद्रत्नरूप्यसंमिश्रहेममालापरिष्कृता ।
ज्वलन्ती तेजसा स्वेन सा मे देवी प्रसीदतु ॥ " इति ।

‡यद्वा, **यशसा ज्वलन्तीम्**–निरतिशयमङ्गलविभूत्यादिमत्तया तथाविध- गुणविभूत्यादिप्रदतया [2] " यद्यद्विभूतिमत् " इत्यादिप्रमाणसिद्धतया

---

[1] मङ्कणसं. [2] गीता. १०-४१.

* 'चन्द्रां' इत्यारभ्य 'यशसा' इत्यन्तं पंक्तिचतुष्टयं न–ख. † यशसा ज्वलन्तीं– अनुकूलाह्लादेन तापहरां । चन्द्रां प्रभासां सर्वस्य...प्रकाशां । दिव्यज्योतिःस्वरूपां । तथा मङ्कण.–ख. ‡ 'यद्वा' इत्यारभ्य 'दीप्यमानां' इत्यन्तं न–ख. § नेमीं–पा.

अनुग्रहैकस्वरूपतया च संपन्नयशसा दीप्यमानाम्‡। **श्रियं**–सर्वसमाश्रयणीयाम्। *यद्वा 'शृणोति श्रावयति' इत्याद्युक्तप्राप्यत्वप्रापकत्वोपयुक्तसमस्ताकारवतीम्। **लोके**–विभूतिद्वये*। 'लोक' इति जातावेकवचनम्; सर्वेषूपरिलोकेषु वर्तमानैरिति यावत्। पूर्वपदेनान्वयः। **देवजुष्टां**–देवैः चतुर्मुखशिवशतमखहुतवहादिदेवैः अनन्तगरुडादिभिः देवोत्तमैश्च, स्वपदलाभाय तदनुगुणसमृद्धये आनन्दानुभवाय च, यजनभजनमननादिभिः **जुष्टां**-सेव्यमानाम्। **मङ्कणसंहितायां** -[1]†"श्यामः किरीटी देवेश" इत्याद्याः श्लोका अप्यनुसन्धेयाः।

यद्वा, **देवजुष्टां** - देवेन निरुपाधिकक्रीडनादिमता [2]"दिव्यो देव एको नारायण" इत्युक्तदेवेन, **जुष्टाम्**-निरतिशयप्रीतिविषयीकृताम्। **उदारां**–तेभ्यः सुरादिभ्यः सर्वकामवर्षिणीम्।
**काश्यपीये**:–[3]"सर्वकामप्रदां देवीं शरण्यामनुचिन्तयेत्।" इति। यद्वा **उदारां** [4]"ऐश्वर्यमक्षरगतिं" इत्याद्युक्तौदार्यगुणवतीम्। उक्तं च **भट्टपराशरपादैः श्रीगुणरत्नकोशे**—

[4]"ऐश्वर्यमक्षरगतिं परमं पदं वा
कस्मैचिदञ्जलिभरं वहते वितीर्य।
अस्मै न किंचिदुचितं कृतमित्यथाम्ब
त्वं लज्जसे कथय कोऽयमुदारभावः॥" इति।

---

**पा**.*'यद्वा' 'विभूतिद्वये' इत्यन्तं न-ख. †श्यामां इति अत्र पाठः।(पश्यत पृ.२९.)

[1] मङ्कणसं. [2] सुबाल. ७. [3] काश्यपीये. [4] श्रीगुग. ५८

**पद्मनेमिम्**—पद्ममेव नेमिः नयनसाधनं यस्याः सा **पद्मनेमिः**। 'नीङ् प्रापणे,' "नियो मिः" इत्यौणादिको 'मि'प्रत्ययः। करतलकलितेन पद्मेन समाश्रितानां सर्वेषां सर्वमनिष्टमपहाय सर्वकालं स्वचरणाम्भोजं प्रापयन्तीमित्यर्थः। यद्वा, **पद्मनेमिं**—नाभिस्थानीयकर्णिकायां नेमिस्थानीयपद्मवतीम्। पद्मस्य नेमित्वोक्त्या कर्णिकाया नाभिस्थानीयत्वव्यञ्जनात्, मातुस्तत्रावस्थानं व्यज्यते। **ताम्**—उक्तगुणविशिष्टाम्। यद्वा, **ताम्**—अहिर्बुध्न्यसंहितालक्ष्मीतन्त्रादिप्रसिद्धवैभवां सर्वेश्वरीम्, **अहम्**—अत्यन्ताकिञ्चनोऽहमुपायान्तरशून्यः, **शरणं प्रपद्ये**।

[1] "इह चामुत्र चानिष्टनिवृत्तीष्टाप्तिसिद्धये।
साक्षाल्लक्ष्म्याः पदाम्भोजे भूयास्तां शरणं मम ॥"

**स्वायंभुवे** [2] "सर्वकामप्रदां सौम्यां संसारार्णवतारिणीम्।
क्षिप्रप्रसादिनीं देवीं शरण्यामनुचिन्तयेत् ॥
अनेनैव प्रपन्नस्य श्रियं देवीं सनातनीम्।
पापानुषङ्गस्सकलस्तत्क्षणादेव नश्यति ॥"

पुनरपि, **त्वां वृणे**—त्वच्चरणारविन्दयुगलमेव परमोपायमध्यवस्यामि। अनया प्रपत्त्या त्वत्प्राप्तिविरोधिनी **अलक्ष्मीः**—दुस्सहभार्या, **मे**—त्वत्स्मृतिकीर्तनादौ प्रवृत्तान्मत्तः, **नश्यतां**—नश्यतु ॥

**लैङ्गे** [3] "अलक्ष्म्येषा च संत्यज्य गमिष्यति च येन वै।
लक्ष्म्यावासो भवेन्मर्त्यस्सूत वक्तुमिहार्हसि ॥" इति

---

1 2 स्वायंभुवे. 3 लैङ्गे. ७.२; ६-११.

विप्रैः पृष्टः सूतः "नारायणं जपेन्नित्यं प्रणम्य पुरुषोत्तमम् ।
स्वपन्नारायणं देवं गच्छन्नारायणं तथा ॥ ६ ॥
भुञ्जन्नारायणं विप्रास्तिष्ठन्जाग्रत्सनातनम् ।
उन्मिषन्निमिषन्वाऽपि नमो नारायणेति वै ॥ ७ ॥
भोज्यं पेयं च लेह्यं च नमो नारायणेति यः ।
अभिमन्त्र्य स्पृशन् भुंक्ते स याति परमां गतिम् ॥ ८ ॥
सर्वपापविनिर्मुक्तः प्राप्नोति परमां गतिम् ॥
अलक्ष्मीश्च मया प्रोक्ता पत्नी या दुस्सहस्य च । ९ ॥
नारायणपदं *ध्यात्वा नश्यत्येव न संशयः ॥
या लक्ष्मीर्देवदेवस्य †हरेरीशस्य वल्लभा ॥ १० ॥
गृहे क्षेत्रे तदाऽऽवासे तनौ वसति §सुव्रता ॥" इति ।

यद्वा, **शरणं प्रपद्ये**—निरपेक्षमदभिमतसाधकत्वाध्यवसायपूर्वकं तव चरणारविन्दयोर्भरन्यासं करोमि । **अलक्ष्मीः**—[1]'सा हि श्रीरमृता सतां' इत्युक्तब्रह्मविद्याया अभावः । **मे**—ब्रह्मविद्याविरोधिपापाक्रान्तस्य । **नश्यतां**—क्षिप्रं नश्यतु । **त्वां वृणे**—अनुग्रहैकरूपां मम मातरं गोप्तृत्वेन, **वृणे**—यथावस्थितमोक्षोपायनिष्पत्त्यर्थं प्रार्थये ॥

अस्मिन्मन्त्रे श्रीशब्दे आनुकूल्यसङ्कल्पप्रातिकूल्यवर्जनरूपमङ्गद्वयमनुसन्धेयम् । 'अहं' शब्दे आकिञ्चन्यानुसन्धानरूपं कार्पण्यं अङ्गमनुसन्धेयम् । 'त्वां वृणे' इत्यत्र गोप्तृत्ववरणरूपमङ्गमनुसन्धेयम् । 'शरणं प्रपद्ये'

**पा.** *श्रुत्वा इति मुद्रितपुस्तके. श्रुत्वा गच्छत्येव–ख. †हरेः कृष्णस्य इति च । §भूतये–ख. [1] तै. ब्रा. ३-७.

इत्यत्र महाविश्वासरूपमङ्गं भरन्यासरूपोऽङ्गी चानुसन्धेयः। एवं मन्त्रार्थमनुसन्धाय श्रीप्रपदनानुष्ठानं कर्तव्यमिति संप्रदायः ॥‡ ॥ ५ ॥

श्रीसाधकेन बैल्वेन फलेन श्रीविघातिनः ।
षष्ठेऽलक्ष्मीश्च तद्विघ्नान्मायादीन्नाशयत्ययम् ॥

**आदित्यवर्णे तपसोऽधिजातो**
**वनस्पतिस्तव वृक्षोऽथ बिल्वः ।**
**तस्य फलानि तपसा नुदन्तु**
***मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥**

**आदित्यवर्णे**–बाह्यान्तरसकलतमोविरोधितेजोमयदिव्यस्वरूपे ।

[1] "तन्मध्ये कर्णिकायां श्रीः संस्थिता पद्ममालिनी ।
दीप्ता चतुर्भुजा भद्रा सा मे देवी प्रसीदतु ॥"

**धनदीये** [2] "भाभासितदिगाभोगां साक्षाद्भानोः प्रभामिव ।
पद्मनाभप्रियाम्........................ ॥ "

अथवा, अकारवाच्यात् सर्वेश्वरात्, इत्यं-प्राप्यं, वर्णं यस्यास्सा, †आदित्यवर्णा । हे **आदित्यवर्णे**

**धनदीये** [2] "पश्यन्तस्तां श्रियं देवीं सर्वे पीताम्बरास्थिताः ।
सुमुखाश्च सुरूपाश्च सर्वलक्षणसंयुताः॥"इति वासुदेवादयः।

---

1     2 धनदीये.

**पा.** *ममान्तरायाश्च. ‡ 'यद्वा' इत्यारभ्य एतत्पर्यन्तं पंक्तिदशकं न–ख.
† आदित्यवर्णा । तपसः–सङ्कल्पात्–ख.

**तपसोऽधिजातः**—**तपसः**–सर्वैश्वर्यास्तव सङ्कल्पात् ; [1] "यस्य ज्ञानमयं तप" इति तपः सर्ववेदनज्ञानमुच्यते । **अधिजातः**–सर्वमङ्गलान्यधिकृत्य जातः–समुद्भूतः । **वनस्पतिः**–वनानां पतिः, सर्वेषां वृक्षसमूहानामधिपतित्वेन प्रसिद्धः । **अथ**–अत्र अथशब्दो मङ्गलवाची मङ्गलस्वरूपः । **बिल्वः**–[2] "बैल्वो यूपो भवत्यसौ वा आदित्यो यतोऽजायत ततो बिल्व उदतिष्ठत् स योऽन्येव ब्रह्मवर्चसमवरुन्ध" इति **ब्राह्मणे** आदित्यकारणभूताच्छ्रियःपतेर्बिल्वस्योत्पत्तिः श्रुता । भगवान् **बोधायनः** तच्छेषे लक्ष्मीसमाराधने [3]"बिल्वमयं परिधिं परिधाय बिल्वमयमिध्ममादध्यात् । अथ पायसादवदाय प्रत्यृचं दशाहुतीर्जुहोति" इति । तत्रैवान्यत्र :–[3] "श्रीकामो जुहुयादग्नौ पद्मैर्बिल्वैस्तथा फलैः" । एवं मङ्गलावहो यो बिल्ववृक्षः, **तस्य फलानि तपसा**–स्वहोमवीक्षणकीर्तनस्पर्शनस्मृतिरूपेण तपसा लक्ष्मीचरणाम्भोजसेवाविरोधिनः सर्वविघ्नान्, **नुदन्तु**—नाशयन्तु ।

तथा **धनदीये** [4] "अल्पां बिल्वान्तरांभोजसरःस्थां संस्मरेद्बहिः ।"
तत्रैवान्यत्र : [4] "श्रियं च देवीमभ्यर्च्य आसीनो बिल्वमूलके ।
नित्यं बिल्वफलान्नाशी बिल्वच्छायामुपोषितः ॥
न छिन्द्याद्बिल्वं यत्नेन नावमन्येत तन्नरः ॥"

के ते विघ्नकरा इत्याशङ्कायामाह–**मायान्तरायाश्च बाह्या अलक्ष्मीः** । †**माया**–अन्यथाज्ञानान्यथाप्रवृत्तयः । **अन्तरायाः**—

---

[1] मुण्ड. १-१-९. [2] तै. सं. २-१-८१. [3] बोधायन. [4] धनदीये.

तद्भजनसेवादिविघ्नाः, तान्—कामक्रोधलोभमोहादीन् ; **बाह्याः**—लक्ष्मी-संबन्धरहिताः;† **अलक्ष्मीः**-लक्ष्मीप्रतिभटभूताः; सर्वांस्तान् विनाशयन्तु। ते सर्वे श्रीसंबन्धविरोधिनः।

तथा [1]"मायां न सेवे भद्रं ते" [2]"विघ्नोऽन्तरायः प्रत्यूहः।"

[3]"त्रिविधं नरकस्यैतद्द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥"
"अतिमानं सदाहासं वाक्प्रलापं विकत्थनम्।
आत्मनाशात्ममननमात्मनिन्दाप्रशंसने॥"

**बाह्याः**—लक्ष्मीव्रतविरोधिनः।

[4]"सरोषं च सवार्तं चार्चनादिकृतं यदि।
तद् यातुधाना गृह्णन्ति तद्यत्नेनैव वर्जयेत्॥
अष्टम्यां च चतुर्दश्यां नवम्यां पर्वणोस्तथा।
श्रीकामो न स्पृशेत् तैलं षष्ठ्यां चैव विशेषतः॥"
[5]"कुशीलनं" इत्यादि॥

**अलक्ष्मीः**—दुस्सहपत्नी, *तत्सहचारिण्यश्च अश्रीः। अश्रीर्वाऽऽह। ता नाशयामि इत्यनेन संबन्धः॥ ॥ ६ ॥

---

[1] भार. उद्यो. ६८-५. [2] अमरको. ३. का. ४. सं. १९.
[3] गीता. १६-२१. [4] [5]

**पा.**†'मायाः' इत्यारभ्य 'संबन्धरहिताः' इत्यन्तं पंक्तिद्वयं न–ख,
*तत्सहचारिण्यश्च श्रीरश्रीर्वाह तरो नाशयामि- इत्येव क, ख, ग, सर्वत्र पाठः। यथानिर्दिष्टमेव समन्वितमिव प्रतिभाति।

**[§]उपैतु मां देवसखः कीर्तिश्च मनुना सह ।**
**प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिंवृद्धिं ददातु मे ॥७॥**

*[विद्यैश्वर्यादिप्राप्तिनिदानकीर्त्यादिकमर्थयते । हे **देवि, मां**–त्वदाश्रयं, **कीर्तिः**-विद्यैश्वर्यादिकृता प्रथा, **मणिना**-रत्नादिभिः, **सह**–युगपत, **उपैतु**-प्राप्नोतु । अहं **अस्मिन्** लोके **प्रादुर्भूतोऽस्मि**-त्वत्-प्रसादात् प्रबुद्धोऽस्मि । **कीर्तिमृद्धिं**-धनादिसमृद्धिं च **मे**-मह्यं, **ददातु**–दिशतु । सा लक्ष्मीः इति शेषः ॥] ॥ ७ ॥

**क्षुत्पिपासां मलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।**
**अभूतिमसमृद्धिं च सर्वान् निर्णुद मे गृहात् ॥८॥**

**क्षुत्**-अन्नेच्छा; [1]"क्षुत् खलु वै मनुष्यस्य भ्रातृव्यः ।" **पिपासां**–विषयस्पृहां ; तृष्णां । [2]"जीर्यन्ति जीर्यतः केशाः" इत्यादि । **क्षुत्पिपासां** इति समासो वा । उभयं नाशयामि इति संबन्धः । **मलां**-[†]मलसंबन्धाम् । **अलक्ष्मीं**–प्रतिभटरूपाममङ्गलस्वरूपाम् । **ज्ये-ष्ठाम्**–दुस्सहपत्नीम् । **अलक्ष्मीं**–दर्शनायोग्याम् । हे लक्ष्मीः, **सर्वान्**

---

[1] तै. सं. ६-१-२१. [2] इति. समु. १०-२९. [†]मलसंबद्धां लक्ष्मीप्रतिभटरूपां(?)

* अस्या ऋचः भाष्यं नोपलभ्यते । अतः काञ्चीप्रतिवादिभयङ्कर अनन्ताचार्यैः (ई. १८९९-सं.) प्रकाशितात् अज्ञातनामधेयस्य कस्यचित् भाष्यात् उद्धृत्य अत्र दीयते । तत्र च ऋक्पाठ एवमस्ति–

[§]उपैतु मां देवि सह कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ ७ ॥

एतान्, त्वत्समाश्रयणबलेन **मे गृहात्**—अस्मद्गृहात्, **नाशयामि**—त्याजयामि ।

**लैङ्गे**-[1]"अलक्ष्मीश्च मया प्रोक्ता पत्नी या †दुष्षहस्य च ।
नारायणपदं स्मृत्वा गच्छत्वेव न संशयः ॥"

तत्र दुष्षहं प्रति—[1] "विष्णुभक्तिविनिर्मुक्ताः तदीयजननिन्दकाः ।
नास्तिकाश्च शठा यत्र साहाय्यस्त्वं समाविश ॥
दुष्षहोऽपि तथोक्तानि स्थानानि च समेयिवान् ।
विशेषाद्देवदेवस्य विष्णोर्निन्दारतात्मनाम् ॥
साहाय्यो मुनिशार्दूल सैषा ज्येष्ठा इति स्मृता ॥"

**श्रीमद्रामायणे**—[2] "प्रणष्टबलिकर्मेज्यामन्त्रहोमजपानि‡ च ।
दुष्कालेनेव भग्नानि भिन्नभाजनवन्ति च ॥
अस्मत्त्यक्तानि वेश्मानि कैकेयी प्रतिपद्यताम् ॥"

**अभूतिं**-इत्यादि । हे देवि ! **अभूतिं**-गृहक्षेत्रारामदासीदासादिविभूतिनिरोधिनीं । **असमृद्धिम्**-धनधान्यस्वर्णरूप्यादिसमृद्धिविघातिनीं सर्वां पूर्वोक्तां सविभूतिकां ज्येष्ठाम्, **मे गृहात्**-त्वदाश्रयणप्रयोजनस्य मम गृहात्, मत्संबन्धिदेशविशेषात्, **निर्णुद**—त्याजय, नाशय इत्यर्थः ॥ ॥ ८ ॥

---

[1] लैङ्गे. [2] रा. अ. ३३-२०, २१.

**पा.** † दुस्सहस्य-ख. ‡जयानि च-ख.

अलक्ष्मयादीन्परानुद्य* स्वगृहात्पुनरेव ताम् ।
सर्वेश्वरीं श्रियं देवीं नवमेनाह्वयत्ययम् ॥

**गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।**
**ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥**

**गन्धद्वाराम्**-गन्धशब्देन लक्ष्मीसमाराधनोपकरणभूतानि गन्ध-पुष्पधूपदीपनैवेद्यानि समाराधनक्रियालंबनभूतानि सर्वाण्युपलक्ष्यन्ते । तानि यस्याः प्राप्तौ **द्वाराणि**-उपायाः; तां गन्धद्वाराम्‡ । **धनदीये :**—

[1]" गन्धं पुष्पं च धूपं च दीपं च सुमनोहरम् ।
लेह्यं मधुरसंयुक्तं शाल्यन्नं च निवेदयेत् ॥
प्रियाणि लक्ष्म्याः पुष्पाणि कमलानि विदुर्बुधाः ॥"

यद्वा, गन्धस्य—पुण्यकर्मसंभूतस्य यशसः प्रापिकाम् ; [2§] "यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति" इति । **दुराधर्षां**-अप्रयतैरमंगलैः पूर्वोक्तोपायरहितैश्च प्राप्तुमशक्याम् । अथवा स्वसमृद्धिप्रकर्षेण सर्वैर्दुराधर्षाम् । तथा [3] "अभितः †पावको-पमम्" इति । **नित्यपुष्टां**-सर्वकालसर्वदेशसर्ववस्तुष्वपि सर्वदा पुष्टाम्। अथवा नित्यैर्गुणैर्विभूत्यादिभिः समृद्धाम् । **करीषिणीम्**-कर्षवतीम् ; मृद्वतीं वा । कर्षमृदोः मङ्गलावहत्वेन लक्ष्मीप्रियत्वं श्रुतिस्मृत्यादिषु

---

[1] धनदीये. [2] तै. उ. २. [3] रा. अ. ९९-२६. **पा.*** अपानुद्य-ख. अलक्ष्म्यादिवन्निराकृत्यास्मद्गृहात्पुनरेव तां-ख. ‡गन्धद्वारां । तथा-ख. § यथा वृक्षस्य इति श्रुतिः । अप्रयतैः-ख. † पावकोपम इति-क, ख.

प्रसिद्धम् । **ईश्वरीं सर्वभूतानाम्**-¶चतुर्मुखशिवशतमखप्रभृतिदेवासुर-सिद्ध*गन्धर्वमनुजानां सर्वेषां भूतानां नित्यसूरीणां च, **ईश्वरीं**–नियन्त्रीं, स्वामिनीं । †निरुपाधिकमैश्वर्यं यस्य स ईश्वरः । "ईश ऐश्वर्ये" इति धातोः [1]"स्थेशभासपिसकसो वरच्" इति 'वरच्'-प्रत्यये ईश्वरशब्दो निष्पन्नः । यद्वा 'अशू व्याप्तौ' इति धातोः [2]"इच्चोपधाया" इति अकारस्थाने ईकारे वरच्प्रत्यये च, ईश्वरशब्दो निष्पन्नः व्यापित्ववाची । तथाऽत्र सर्वभूतेश्वरीं सर्वभूतनियन्त्रीं, व्यापिनीं वा । [3]"ईशाना देवी भुवनस्य" इत्यस्मिन् मन्त्रे 'भुवन'शब्दः चिदचिदात्मकसर्वभूतपरः । [4]"अस्येशाना जगतो विष्णुपत्नी" इति अस्मिन् मन्त्रेऽपि जगच्छब्दस्सर्वभूतपरः; तदैकार्थ्यं गन्धद्वारामिति मन्त्रे द्रष्टव्यम् । उपबृंहिता चेयं **श्रीवैष्णवे पुराणे** :—

[5]"नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ॥" इति ।

अन्यत्रापि [6]"त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम् ॥" इति । भगवच्छास्त्रवचनैश्च उपबृंहितेयं श्रुतिः । यथा विष्वक्सेनाय भगवान् आह—[7]"तथा लक्ष्म्याः प्रभावं च वक्ष्ये शृणु समाहितः ।
गुणतश्च स्वरूपेण व्याप्तिस्साधारणी मता ॥

---

[1] अष्टा. ३-२-१७५. [2] अष्टा. उणादि. ५-७३४. [3] तै. काठ. ३-३-१२.
[4] तै. सं. ४-४-१२. [5] वि. पु. १-८-१७. [6] वि. पु. १-९-१२६.
[7] विष्वक्. सं.(?)

**पा.** ¶ चतुर्मुखवासवादि-ख. *गन्धर्वमनुजादीनां सर्वेषां ईश्वरीं–ख.
†'निरुपाधिकमैश्वर्यं' इत्यारभ्य 'इहोपह्वये' इत्यन्तं २९ पंक्तयः न–ख.

यथा मया जगद्व्याप्तं स्वरूपेण स्वभावतः ॥
तथा व्याप्तमिदं सर्वं नियन्त्री च तथेश्वरी ॥*
यथा मया हि सा व्याप्ता तया व्याप्तोऽहमीश्वरः ॥''

अन्यत्र :-[1] ''अस्या मम च शेषं हि विभूतिरुभयात्मिका ॥'' इति ।

ननु ''ईश्वरीं सर्वभूतानां'' इत्यत्र 'ईश्वरी'इति पदं ईश्वरपत्नीत्वपरं किं न स्यादिति चेन्न–सर्वभूतानामिति षष्ठ्यन्तपदानन्वयः स्यात्। षष्ठ्यन्तपदस्य पदान्तरोपसर्जनेनेश्वरशब्देन कथमन्वयः । पदार्थः पदार्थेन संबद्ध्यते, न तु तदेंकदेशेन इति व्युत्पत्तिविरोधात् । 'ईश्वरीं' इत्यत्र ईश्वरपदस्य अन्यान्वितत्वेन निराकांक्षत्वाच्च न षष्ठ्यन्तपदान्वयः । साकांक्षयोरेव परस्परान्वयः; न तु निराकांक्षयोः, निराकांक्षस्य साकांक्षेण वेति । अत एव 'गाढे पङ्कजं' 'गभीरे सरसिजं' इति 'गाढ'- 'गभीर'पदयोः 'पङ्क''सरो'ऽन्वयाभिप्रायेण न प्रयोगः । अत एवात्र सर्वभूतेश्वरत्वमेवाभिप्रेतम् ॥

**ताम्**–उक्तगुणलक्षणाम् । **इहोपह्वये**[†]–पूर्वमलक्ष्म्यादिदूषिते इदानीं तत्त्यागात् देव्यागमनयोग्ये, **उपह्वये**–सर्वसमृद्ध्यर्थमाह्वयामि ।[‡] **श्रियं**–'श्री श्रये' इति सर्वाधारत्वं; पुरुषकारत्वेनोपायत्वेन चाश्रीयमाणत्वम् । 'शॄ हिंसायां' इति आश्रितदोषनिवर्तकत्वम् । 'श्रु श्रवण' इति आश्रितानामार्तनादं स्वयं श्रुत्वा, भगवन्तं प्रति श्रावकत्वम् ।

---

[1] विष्वक्. सं. **पा**. [‡]इत आरभ्य, 'अलमतिविस्तरेण' इत्यन्तं न । अतः परं 'कामानां दशमे' इति वर्तते । दशमी ऋक् प्रारभ्यते–ख. *इति इत्यधिकः–ग

श्रा परिपाक' इति आश्रितदोषानपहाय, [1]"श्रीणाति च गुणैर्जगत्" इति आश्रितगुणपूरकत्वम् । एवमादयो धर्माः सूचिताः 'श्री'शब्देन । तथा च भगवच्छास्त्रे—

[1]"शृणाति निखिलान् दोषान् श्रीणाति च गुणैर्जगत् ।
श्रीयते चाखिलैर्नित्यं श्रयते च परं पदम् ॥" इति ॥

तथा चोक्तगुणविशिष्टां इत्यर्थः ॥

ननु [2]"सर्वस्य प्रभुमीशानं" [3]"विश्वस्येशानं वृषभं मतीनां," [4]"एष सर्वेश्वर एष *भूतपतिः" [5]"ईशानः †सर्वभूतानामीश्वरः सर्वभूतानां," [6]"पतिं विश्वस्यात्मेश्वरं," [7]"सर्वैश्वर्यसंपन्नः सर्वेश्वरश्च शंभुः," [8]"तमीश्वराणां परमं महेश्वरं," *इत्यादिश्रुतिभिः भगवत एव सर्वेश्वरत्वं प्रतीयते । तत् कथं देव्याः सर्वेश्वरत्वं, बहुप्रमाणविरोधात्, [9]"ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति श्रुतावेव भूमिसाधारणतया भगवच्छेषत्वप्रतिपादनाच्च† । देव्याः सर्वेश्वरत्वे, भगवत्साम्यापत्त्या [10]"न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुतिविरोधात्, [11]"एकः शास्ता न द्वितीयोऽस्ति शास्ता" इति शासित्रन्तरनिषेधपरश्रुतिविरोधाच्च । देव्याः श्रूयमाणं सर्वभूतेश्वरत्वं विभूतिद्वयशेषित्वरूपतया अन्यथा नेयमिति चेत् ।—

[1]. अहि. सं. [2] श्वे. ३-१७. [3] तै. आर. ३-१५-४६. [4] बृ. ६-४-२२. [5] तै. उ. २-४७. [6] तै. नार. [7] अथर्वशि-२-१७. [8] श्वे. ६-७. [9] तै. आर. ३-१३-४१. [10] श्वे. ६-८. [11] भार. आश्व-२७-१. (?)

**पा.** *भूताधिपतिः †सर्वविद्यानां *इत्यादिभिः–ग. †भगवत्साम्यापत्त्या–ग.

अत्रेदं तत्त्वम्– [1]"सदेव सोम्येदमग्र आसीत्" [2]"ब्रह्म वा इदमग्र आसीत्," [3]"आत्मा वा इदमेक एवाग्र आसीत्," [4]"एको ह वै नारायण आसीत्" इत्यादिकारणवाक्येषु 'सत्' 'ब्रह्म' 'आत्म' 'नारायण'शब्दाः छागपशुन्यायेन सामान्यविशेषभावतया, नारायणे देवताविशेषे पर्यवसन्नाः यथा, तद्वत्, [5]"श्रद्धया देवो देवत्वमश्नुते," [6]"श्रद्धा प्रतिष्ठा लोकस्य देवी" इत्यादिके [7]"ईशाना देवी भुवनस्याधिपत्नी," [8]"अस्येशाना जगतो विष्णुपत्नी," [9]"ईश्वरीं सर्वभूतानां" इति वाक्येषु श्रूयमाणः 'श्रद्धा' 'विष्णुपत्नी' 'श्री'शब्दाः सामान्यविशेषभावतया तन्न्यायेन लक्ष्मीरूपे देवताविशेषे पर्यवसन्नाः ॥

तथा हि—यथा सच्छब्दस्य बृहदबृहत्साधारणस्य 'ब्रह्म' शब्दोदिते विशेषे पर्यवसानम्, 'ब्रह्म'शब्दस्य चेतनाचेतनसाधारणस्य 'आत्म'शब्दोदिते चेतने पर्यवसानम्; 'आत्म'शब्दस्य च जीवेश्वरसाधारणस्य च 'नारायण'शब्दोदिते देवताविशेषे पर्यवसानं यथा, तद्वत् 'श्रद्धा'शब्दस्य चेतनाचेतनसाधारणस्य 'विष्णुपत्नी'शब्दोदितायां देवतायां पर्यवसानम् । 'विष्णुपत्नी'शब्दस्यापि *श्रीभूमिसाधारणस्य 'श्री'शब्दवाच्यायां लक्ष्म्यां पर्यवसानं युक्तम् । ततः त्रयाणां

---

[1] छा. ६-२-१. [2] बृ. ३-४-११. [3] ऐतरेय. १-१-१. [4] महोप. १-१

[5] तै. काठ. ३-३-९. [6,7] तै. काठ. ३-३-१२.

[8] तै. सं. ४-४-१२. [9] तै. उ. २.

**पा.** *श्रीभूमिशब्दसाधारणस्य–क.

वाक्यानामैककण्ठ्यावश्यंभावात् लक्ष्म्याः सर्वभूतेश्वरत्वं सिद्धम् । तदपि अनन्याधीनत्वरूपं मुख्येश्वरत्वं पतिवत् ॥

नन्वेवं श्रियोऽप्यनन्याधीनत्वे पतिवन्मुख्येश्वरत्वे, सर्वागमानामेकेश्वरपरत्वाभावादैककण्ठ्यं न स्यादिति चेन्न । अन्योन्येच्छाविघातकयोः अन्योन्यगुणप्रधानभावगन्धरहितयोः अन्योन्यसाहित्यानादरेण जगद्व्यापारेषु पृथक् पृथक् प्रवृत्तिमतोर्द्वयोरीश्वरयोः प्रतिपादने ह्यागमानामैककण्ठ्यहानिः । इह त्वनयोर्दांपत्यादिवचनबलात् अन्योन्येच्छाविघातराहित्ये समप्रधानभावराहित्ये जगद्व्यापारेषु पृथक्प्रवृत्तिराहित्यादौ च सर्वागमानां तात्पर्याभ्युपगमात्, ऐककण्ठ्यमुपपन्नम् । सर्वागमानामीश्वरव्यक्त्यैक्यपरत्वरूपमैककण्ठ्यं ह्यत्र दुरुपपादं ; श्रीश्रीशविषयसर्वभूतेश्वरत्ववचनयोर्द्वयोरपि तुल्यबलत्वेन, तयोरन्यतरस्याप्यन्यथा नेतुमशक्यत्वात् । अतो दंपत्योरन्योन्येच्छाविघातादिराहित्ये तात्पर्यं वा ; पत्युः प्रधानत्वेन प्रधानैक्यतात्पर्यं वा सर्वागमानामैककण्ठ्यमित्येव तेषामैककण्ठ्यं निर्वाह्यम् ।

किञ्च यथा पतिः सर्वचेतनाचेतनतत्त्वनियन्ता, तथा देव्यपि सर्वचेतनाचेतनतत्त्वनियन्त्री । यथा च पतिरनन्याधीनस्वरूपस्थितिप्रवृत्तिकः, तथा देव्यप्यनन्याधीनस्वरूपस्थितिप्रवृत्तिकैव । अत उभयोरप्यैश्वर्यमत्यन्तसमानम् । एवं देव्याः सर्वनियन्तृत्वेऽपि, यथा पत्युरीशितव्यराश्यनन्तर्भावात् तं प्रति देव्या नियन्तृत्वप्रसक्तिर्नास्ति, तथा देव्या अपि तद्राश्यनन्तर्भावादेव देवीं प्रति तस्यापि नियन्तृत्वं

नास्त्येव । अतो यथा भगवतो नियन्त्रन्तराभावेन तदैश्वर्यं स्वापेक्षयोत्कृष्टावधिरहितं, तथा देव्या अपि नियन्त्रन्तराभावात तदैश्वर्यमपि स्वापेक्षया उत्कृष्टावधिरहितम् । उक्तार्थे प्रमाणं च, बलाबलवैषम्यनियामकाभावेन समतुलारूढं परस्परबाधाद्यनर्हं उभयोरप्यविशिष्टं सर्वभूतेश्वरत्ववचनम् । अपि च भगवत ईश्वरतत्त्वरूपत्वेनेशितव्यतत्त्वेष्वनन्तर्भावात्, तद्व्यतिरिक्तविषयमेव देव्या ऐश्वर्यमिति वक्तव्यम् । ऐश्वर्यं हि ईशितव्यवस्तुमात्रप्रतिसंबन्धिकम् । न त्वीश्वरवस्तुप्रतिसंबन्धिकमपि, अयोग्यत्वात् । न च तावता तस्या अनवधिकातिशयत्वहानिः ईशितव्यकृत्स्नप्रतिसंबन्धिकत्वादेव तदुपपत्तेः, स्वापेक्षया उत्कृष्टावधिराहित्याच्च । भगवदैश्वर्यमपि हि न देवीप्रतिसंबन्धिकम्, येन तदुत्कृष्टावधि स्यात् । पतिवत् देव्या अपि ईश्वरतत्त्वरूपत्वेन तन्न्यायसाम्यात् इति ॥

तदेवं स्तोत्ररत्ने भगवत इव देव्याः **चतुःश्लोक्यां** स्वाभाविकानवधिकातिशयेशितृत्वरूपं पतिवत् मुख्यमीश्वरत्वं **यामुनाचार्यैः** कण्ठरवेण प्रतिपादितम् । [1]"स्वाभाविकानवधिकातिशयेशितृत्वं
नारायण त्वयि न मृष्यति" इति ।

[2]"यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभु-
र्नालं मातुमियत्तया निरवधिं नित्यानुकूलं स्वतः ।" इति ।

**भगवद्भाष्यकारैरपि पृथुगद्ये** [3]"भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणां" इति,

[1] स्तोत्ररत्ने. १२. [2] चतुःश्लो. २. [3] (पृथु)शरणा–ग.

**वेदार्थसंग्रहे** च [1]"अभिमतस्वानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकमहिममहिषी" इति प्रतिपादितम् । **श्रीवत्सचिह्नमिश्रैरपि** [2]"देवि त्वन्महिमावधिर्न हरिणा नापि त्वया ज्ञायत" इति अनवधिकमाहात्म्यं प्रतिपादितम् । तदात्मजैश्च **भट्टपराशरपादैः**—

[3]"अस्येशाना जगत इति ते धीमहे यां समृद्धिं
श्रीश्रीसूक्तं बहुमुखयते तां च शाखानुशाखम् ।" इति ॥

एवमनन्याधीनत्वेन पत्या समस्वातन्त्र्यं कण्ठरवेण वर्णितं **श्रीगुणरत्नकोशे** [4]"युवयोः स्वातन्त्र्यमत्यङ्कुशं" इति । [5]"सर्वस्य प्रभुमीशानं" इत्यादिवाक्येषु, देवीविषयवचनेषु [6]"अस्येशाना" इत्यादिषु[च]'ईशाने'ति चानश्प्रत्ययेन स्वाभाविकेश्वरत्वमवगम्यते; अनन्याधीनत्वमिति यावत् । एवं सर्वभूतेश्वरत्ववचनसाम्यात् द्वयोरपि मुख्येश्वरत्वस्य दुरपह्नवत्वेन, सर्वागमानामीश्वरव्यक्त्यैक्यपरत्वेऽनुपपन्ने, सर्वागमानामैककण्ठ्यमन्योन्येच्छाविघातादिनिवृत्तौ तात्पर्यमुखेनोपपन्नमस्तु इत्यर्थः ॥

ननु पतिविषये सर्वभूतेश्वरत्ववचने 'सर्व'शब्दः श्रियमपि संगृह्णाति ; पत्नीविषये तु पतिव्यतिरिक्तपरः । तत्कथमत्र सर्वभूतेश्वरत्ववचनसाम्योक्तिरिति चेदुच्यते—पतिविषयवचनेऽपि 'सर्व'शब्दो देवीव्यतिरिक्तपरः । ईश्वरत्वेन श्रूयमाणायास्तस्या ईशितव्यपरे तस्मिन्

---

[1] वेदा. सं. [2] श्रीस्तव. ८.
[3] श्रीगुणर. १३. [4] श्रीगुणर. ५३. [5] श्वे. ३-१७. [6] तै. सं. ४-४-१२.

संग्रहीतुमशक्यत्वात्। ब्रह्मरुद्रादीनां त्वीश्वरत्वेन श्रुतानामपि कार्यत्वकर्मवश्यत्वादिभिरनीश्वरत्वनिश्चयात् तत्र संग्रहो युज्यते । तथाऽत्र संकोचाभावात् अस्या ईश्वरत्वं पतिवदनवधिकातिशयमेव श्रुतिसिद्धं तिष्ठतीति नास्यास्तत्र सर्वशब्दे संग्रहः शक्यः । जगदीश्वरत्वेऽपि, पतिं प्रति नियाम्यत्वात्, अस्या अपि तस्मिन् 'सर्व'शब्दे संग्रहः स्यादिति चेन्न-- उभयत्र 'सर्व'शब्दे तुल्ये श्रूयमाणे, तस्याः तं प्रति नियाम्यत्वनिश्चयायोगात् । अन्यथा वैपरीत्यस्यापि प्रसङ्गात् । एकः 'सर्व'शब्दः संकुचितविषयः, अन्यस्तु न तथेत्यत्र विनिगमकाभावेन, उभयोरपि तुल्यविषयत्वस्यैव न्याय्यत्वात् । तत्र च द्वयोरप्यन्योन्यनियन्तृत्वस्य दुर्वचत्वात्, उभावपि सर्वशब्दौ उभयव्यतिरिक्तपरौ तिष्ठतः । तथा च सर्वभूतेश्वरत्ववचनसाम्यसिद्धिः । एवं देव्या अपि सर्वभूतेश्वरत्वश्रुतिसद्भावात् तां प्रति भगवतो नियन्तृत्वासंभवेन, तदैश्वर्यापेक्षया भगवदैश्वर्यमपि नोत्कृष्टमित्ययमर्थः भगवद्भाष्यकारैः प्रतिपादितः [1] "अनवधिकातिशय" इति । स्थापितं चैतच्छ्रीवत्सचिह्नमिश्रैः भट्टपराशरपादैश्च ॥

ननु श्रियोऽपि 'नार'शब्दार्थत्वेन भाष्यकारादिभिर्व्याख्यानात्, तेन तस्यास्तं प्रति नियाम्यत्वसिद्धेः, 'नार'शब्दस्वरूपश्रुतिरत्र सर्वशब्दयोरतुल्यविषयत्वे *विनिगमका स्यादिति चेन्न—'नार'शब्दस्य

---

[1] पृथुगद्ये. पा *विनिगमिका.–ग.

श्रीमात्रविषयत्वाभावेन सामान्यवचनरूपत्वात् । तेन विशेषवचनसंकोचायोगात् । श्रीविषयविशेषवचनसिद्धसर्वभूतेश्वरत्वसामर्थ्येन, तस्यास्तं प्रति नियाम्यत्वाभावे सिद्धे, सामान्यवचनरूपस्य 'नार'शब्दस्य तदनुरोधेन निर्वहणस्यैव न्याय्यत्वात् । अतोऽस्या 'नार'शब्दार्थत्वं [1] "नरसंबन्धिनो नारा" इति व्युत्पत्तिमात्रेण ; न तु [†2] "नराज्जातानि" इति व्युत्पत्त्या । संबन्धश्चात्र पतिपारार्थ्यमात्रं, न तु स्वतो नियाम्यत्वं; उक्तरीत्या तस्य विशेषवचनबाधितत्वात् ॥

अस्याः [‡] 'नार'शब्दार्थत्वमेतावन्मात्रेणैवेति एतेन एतदपि निरस्तम् : [3] "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति पत्नीत्वेन शेषभूताया [‖] नियाम्यत्वस्य कल्पयितुमुचितत्वात्, इदं वचनमत्र विनिगमकं स्यात् इति । पत्नीत्वेन शेषत्वेऽपि, सर्वभूतेश्वरत्वश्रुतिविरोधेन स्वतो [§] नियाम्यत्वकल्पनस्यैवानवकाशात् । किञ्च पत्नीत्वस्य विग्रहविशिष्टधर्मत्वेन बहिरङ्गत्वं, नियन्तृत्वस्य स्वरूपधर्मत्वेनान्तरङ्गत्वात् । विग्रहविशिष्टतया बहिरङ्गभूतेन वचनेनान्तरङ्गवचनस्य सङ्कोचायोगात् । न हि विग्रहरहितस्याऽऽत्मस्वरूपमात्रस्य पत्नीत्वं लोके वेदे वा दृष्टचरम् । तस्मादन्तरङ्गवचनस्थकण्ठोक्तिसिद्धसर्वभूतेश्वरत्वसामर्थ्येन स्वतन्त्रत्वे

---

[1] अहि. सं. ५२-५०. [2] भार. आनु. १८६-७. (अष्टा. ब्र. १-३५.)
[3] तै. आर. ३-१३.

**पा.** [†] नराज्जातानि तत्त्वानि–ग. [‡] अस्य नार.........त्वमेव ताव. क. नारशब्दार्थत्वं तावन्मात्रेण–ग. [‖] नियोज्यत्वस्य–ग. [§] नियोज्यत्व–ग.

निश्चिते, स्वतन्त्रयोरपि तयोरन्योन्येच्छया पतिपत्नीभाव इति पत्नीत्वस्य तदनुरोधेन निर्वहणं न्याय्यम् । तथैव भट्टपराशरपादैः [1] "तं च त्वत्कं पतिमधिजगावुत्तरश्चानुवाक" इति निर्व्यूढम् ।

ननु [2]"न तस्येशे कश्चन" इति पत्युरीश्वरान्तरनिषेधो दृश्यते । तथा च पतिमात्रस्येश्वरान्तरनिषेधबलात् चेतनान्तरवत् पत्न्या अपि सेश्वरत्वसिद्ध्या, पत्यावैश्वर्यविश्रमस्य स्वीकर्तव्यत्वात्, अस्याः सर्वभूतेश्वरत्ववचनं संकोचनीयम् । [3]"न तत्समश्चाभ्यधिकश्च दृश्यते," [4]"एकः शास्ता न द्वितीयोऽस्ति शास्ता" इत्यादिभिस्तत्सदृशनिषेधाच्च । अत इदं वचनजातमत्र विनिगमकमिति चेन्न—तस्य निषेधरूपत्वेन धर्मिग्राहकमुपजीव्योदेतव्यत्वात् सर्वभूतेश्वरत्ववचनस्य च धर्मिग्राहकत्वात् । ईश्वरे सिद्धे हि, तस्येश्वरान्तरं सदृशं च निषेद्धव्यम् । न हि भूतलादिधर्मिणि अगृहीते, तत्र घटादिकं निषेद्धुं शक्यम् । अतः सर्वभूतेश्वरत्वसिद्धिवेलायां, [5]"न तस्येशे कश्चन" इत्यादेरनुदयात्, तस्य श्रीविषयसर्वभूतेश्वरत्ववचनसंकोचकत्वं न संभवति । ततश्च पूर्वोक्तरीत्या द्वयोरप्यविशेषेण प्रथमं सर्वभूतेश्वरत्वे निश्चिते, तदुपजीवनेन प्रवृत्तः पत्युः सदृशनिषेधस्तदनुरोधेन नेतव्यः । एवंविधपत्न्यादिविशिष्टत्वेन सदृशः कश्चिदन्यो नास्तीति । एतत्सर्वमभिप्रेत्य वेदार्थसंग्रहे भगवद्भाष्यकारैः 'महिषी'शब्दं प्रयुञ्जद्भिः निर्व्यूढम् [6]"अनवधिकमहिम-

---

[1] श्रीगुणर. १३. [2] तै. नारा. [3] श्वे. ६-८. [4] भार. आश्व. २७-१.
[5] तै. नारा. [6] वेदार्थसं. पा. [1]स्थापितं च त्वत्कं पतिमधिजगाम—ग.

महिषी'' इति । पतिमात्रस्य ईश्वरान्तरनिषेधश्च तस्य नियन्त्रन्तरं नास्तीत्येतावन्मात्रमभिधत्ते, न तु तदन्यस्य सेश्वरत्वमपि; तावत्पर्यन्त-बोधने सामर्थ्याभावात्, तत्कल्पने गौरवात्, देव्याः सर्वभूतेश्वरत्वश्रुति-विरोधेन तत्कल्पनानवकाशाच्च । अतो देव्याः सर्वभूतेश्वरत्वादिश्रुति-स्वारस्यसंकोचकाभावात्, दंपत्योस्सर्वभूतेश्वरत्वादिवचनसाम्यं सिद्धम् ॥

उपबृंहणान्यपि देव्याः पतितुल्यैश्वर्यप्रतिपादनेन तयोः सर्वभूते-श्वरत्वादिवचनसाम्यं दृढीकुर्वन्ति । यथा भगवच्छास्त्रे [1]''सर्वैश्वर्यगुणो-पेता नित्यं तद्धर्मधर्मिणी ।'' इति । अस्यार्थः—सर्वेश्वरत्वधर्मविशिष्टा, नित्यं-सर्वकालेषु, तद्धर्मधर्मिणी-तच्छब्देन भगवानुच्यते; तद्धर्माः—शारीरकाध्यायचतुष्टयविवक्षितकारणत्वाबाध्यत्वोपायत्वोपेयत्वसर्वान्तर्या-मित्वसर्वशरीरित्वादयो धर्माः देव्या अपि धर्मा इति 'तद्धर्मधर्मिणी' इत्युक्तम् ॥

देव्याः सर्वव्यापकत्वसर्वान्तर्यामित्वसर्वनियन्तृत्वादिप्रतिपादकानि श्रीविष्णुपुराणभगवच्छास्त्रवचनानि प्रागेव दर्शितानि । अन्यान्यपि वचनानि विलिख्यन्ते :—

*श्रीमदहिर्बुद्न्यसंहितायां द्वितीयेऽध्याये

''षाड्गुण्यं तत्परं ब्रह्म स्वशक्तिपरिबृंहितम् ।
'बहु स्यां' इति संकल्पं भजते तत्सुदर्शनम् ॥ ६२ ॥''

---

[1] भगवच्छास्त्रे

**तृतीयेऽध्याये नारदः—**

"षाड्गुण्यं तत्कथं ब्रह्म स्वशक्तिपरिबृंहितम् ।
तस्य शक्तिश्च का नाम यया बृंहितमुच्यते ॥ १ ॥

**अहिर्बुद्ध्न्यः**—"एवं भगवतस्तस्य परस्य ब्रह्मणो मुने ॥ ४ ॥
सर्वभावानुगा शक्तिर्ज्योत्स्नेव हिमदीधितेः ।
भावाभावानुगा तस्य सर्वकार्यकरी विभोः ॥ ५ ॥
[1]* स्वात्मबुद्धिस्समुन्मीलत्परावरजगत्स्थितिः ॥ ७ ॥
नित्या कालापरिच्छेदात्पूर्णाकाराऽवियोगतः ।[2]
व्यापिनी देशविभ्रंशाद्रिक्ता पूर्णा च सर्वदा ॥ ८ ॥
जगत्तया लक्ष्यमाणा सा लक्ष्मीरिति गीयते ।
श्रयन्ती वैष्णवं भावं सा श्रीरिति निगद्यते ॥" ९ ॥ इत्यारभ्य,

"उदधेरिव च स्थैर्यं महत्तेव विहायसः ।
प्रभेव दिवसेशस्य ज्योत्स्नेव हिमदीधितेः ॥ २३ ॥
विष्णोः सर्वाङ्गसंपूर्णा भावाभावानुगामिनी ।
शक्तिर्नारायणी दिव्या सर्वसिद्धान्तसंमता ॥ २४ ॥
[3] देवाच्छक्तिमतो भिन्ना ब्रह्मणः परमेष्ठिनः ।
एष चैषा च शास्त्रेषु धर्मधर्मिस्वभावतः ॥ २५ ॥

---

पा. *दीयमानाः पाठभेदाः मदरास् अड्यार् यन्त्रालये(ई. १९१६) मुद्रितायां अहिर्बुद्ध्न्यसंहितायां उपलभ्यमानाः । [1] स्वात्मभित्तिसमुन्मीलत् । [2] पूर्णाऽऽकारवियोगतः [3] देवी शक्तिमतो भिन्ना—ग.

भवद्भावस्वरूपेण तत्त्वमेकमिवोदितौ ॥ २६ ॥
भवद्भावात्मकं ब्रह्म ततस्तच्छास्त्रगं परम् ।
भवान्नारायणो देवो भावे लक्ष्मीरहं परा ॥
लक्ष्मीनारायणाख्यं तदतो ब्रह्म सनातनम् ।
स्वातन्त्र्येण स्वरूपेण विष्णुपत्नीयमद्भुता ॥ २८ ॥

. . . . . . . . . . .

. . . . . . . . . . .

नारायणः स विश्वात्मा भावाभावमिदं जगत् ॥ ४१ ॥
निष्कलेन स्वरूपेण [1]यथा व्याप्य नियच्छति ।
सर्वभावात्मिका लक्ष्मीरहन्ता परमात्मिका ॥ ४२ ॥
तद्धर्मधर्मिणी देवी भूत्वा सर्वमिदं जगत् ॥ ४३ ॥
निष्कलेन स्वरूपेण साऽपि [2]तत्त्वं नियच्छति'' ॥ ४४ ॥

इत्यादिकमुक्तं ।

**षष्ठेऽध्याये** ''ताविमावेकधैवोक्तौ भेद्यभेदकभावतः ।
[3]पृथक्त्वेन तु शास्त्रेषु जगद्धेतुतयोदितौ ॥ २ ॥
नैव शक्त्या विना कश्चिच्छक्तिमानस्ति कारणं ।
न च शक्तिमता [4]शक्तिर्विना काऽप्यवतिष्ठते ॥ ३ ॥
तत्तद्गौरवमाश्रित्य तन्त्रवेदान्तपारगैः ।
जगद्धेतुतया देवावेकैकाविव दर्शितौ'' ॥ ४ ॥

---

[1] यदा प्राप्य. [2] तद्वत्. [3] पृथक्त्वेन च–ग. [4] शक्तिर्विनैका.

**सप्तमेऽध्याये** "एका शक्तिर्हरेर्विष्णोः सर्वभावानुगामिनी ।
देवी षाड्गुण्यपूर्णा या[1] ज्ञानानन्दक्रियामयी" ॥६५॥

**एकविंशेऽध्याये** "तद्धर्मधर्मिणीं शक्तिं ब्रह्मणोऽनपगामिनीम् । ७ ॥
ज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभावतीम् ॥ ९ ॥
अनन्तानन्तरूपां तामभेद्यां सर्वभेदिनीम्" ॥१०॥ इत्यादि ॥

**लक्ष्मीतन्त्रे प्रथमेऽध्याये** :—
"एषैव सृज्यते काले सैषा पाति जगत्त्रयम् ।
जगत्संहरते चान्ते तत्तत्कारणसंस्थिता ॥
मातरं जगतामेतामनाराध्य महत् कुतः ॥" इत्यादि ।

**द्वितीयेऽध्याये** श्रीरुवाच—
ज्ञानात्मकं परं रूपं ब्रह्मणो मम चोभयोः ।
शेषमैश्वर्यवीर्यादिज्ञानधर्मः सनातनः ॥ २५ ॥
अव्याहतिर्यदुद्यन्त्यास्तदैश्वर्यं परं मम ।
जगत्प्रकृतिभावो मे यः सा शक्तिरुदीर्यते ॥ २८ ॥
सृजन्त्या यच्छ्रमाभावो मम तद्बलमिष्यते ।
भरणं यच्च कार्यस्य [2]बलं तस्य प्रचक्षते ॥ २९ ॥
विकारविरहो वीर्यं प्रकृतित्वेऽपि मे सदा ॥ ३० ॥
स्वभावं हि जहात्याशु पयो दधिसमुद्भवे ।
जगद्भावेऽपि सा नास्ति विकृतिर्मम नित्यदा ॥ ३१ ॥

---

[1] पूर्णा सा. [2] बलं तच्च.

सहकार्यनपेक्षा मे सर्वकार्यविधौ हि या ।
तेजः षष्ठं गुणं प्राहुस्तमिमं तत्त्ववेदिनः'' ॥ ३३ ॥ इति ।

**तृतीयेऽध्याये** ''नित्यनिर्दोषनिस्सीमकल्याणगुणशालिनी ।
अहं नारायणी नाम [1]साऽहन्ता वैष्णवी परा ॥ १ ॥
देशात्कालात्तथा रूपात्परिच्छेदो न मे स्मृतः ।
संविदेव च मे रूपं [2]सर्वैश्वर्यादिको गुणः ॥ २ ॥
अहं संविन्मयी [3]पूर्णा व्यापिन्यपि पुरन्दर ॥ ८ ॥
अधिष्ठाय गुणान्सृष्टिस्थितिसंहारकारिणी ।
निर्गुणाऽपि गुणानेतानधिष्ठायाऽऽत्मवत्तया[4] ॥ ९ ॥
चक्रं प्रवर्तयाम्येका सृष्टिस्थित्यन्तरूपकम् ॥ १० ॥
ईशो नारायणो ज्ञेय ईशता तस्य चाप्यहम् ।
ईशितव्यं च विज्ञेयं चिदचिच्च पुरन्दर'' ॥ १४ ॥ इति ।

तत्रैव [5]''ईशाऽहमीशितव्येन स च देवः सनातनः ।
ईशितव्यं द्विधा प्रोक्तं चिदचिद्व्यतिरेकतः ॥ २२ ॥
विभक्ते अपि ते एते शक्ती चिदचिदात्मके ।
मत्स्वाच्छन्द्यवशेनैव मम रूपे सनातने'' ॥ २४ ॥ इति ।

**चतुर्थेऽध्याये** ''पूर्णषाड्गुण्यरूपत्वात् साऽहं भगवती स्मृता ॥४८॥
मत्तः प्रक्रियते विश्वं प्रकृतिश्चास्मि कीर्तिता'' ॥ ५१ ॥

---

**पा.**[1] सा सत्ता–ग. [2] नैवैश्वर्यादिको. [3] पूर्वव्यापि. [4] आत्मवाञ्छया.
[5] ईशो हि.

**पञ्चमेऽध्याये** "महान्नाम समाख्यातः विकारः [1]पूर्वको विधेः ॥४०॥

महान्तमाविशाम्येनं प्रेरयामि [2]स्वसृष्टये ।
प्रेर्यमाणात्ततस्तस्मादहंकारश्च जज्ञिवान् ॥ ४४ ॥

आविश्यामुमहंकारं सृष्टये प्रेरयाम्यहम्" ॥ ४६ ॥ इत्यादिना
"महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ।" *इत्यादितन्मा-
त्रादिसृष्टिक्रमेण विस्तरेण देव्याः जगद्व्यापारः उक्तः ।

**अष्टमेऽध्याये** "एकधा च द्विधा चैव तैस्तैस्तत्त्वाब्धिपारगैः ।
व्यपदिश्यावहे शास्त्रे तावावां सर्वकारणम् ॥"

**द्वादशे** "स्वतन्त्रा [3]विश्वसिद्धीनां हेतुश्चात्र महाद्भुतः ।
शक्तिर्नारायणस्याहं नित्या देवी सदोदिता ॥ १२ ॥

तस्या मे पञ्चकर्माणि नित्यानि त्रिदशेश्वर ।
[4]स्थिरो भावस्तथा सृष्टिः स्थितिः संहृतिरेव च ॥

अनुग्रह इति प्रोक्तं मदीयं कर्मपंचकम्" ॥ १४ ॥

**त्रयोदशेऽध्याये** "आत्मभित्तौ जगत्सर्वं स्वेच्छयोन्मीलयाम्यहम् ॥२१॥
मयि लोकाः स्फुरन्त्येते [5]जाले शकुनयो यथा ॥ २२ ॥
नायिका सर्वशक्तीनां सर्वलोकमहेश्वरी ॥"

**सप्तदशे** "कान्तस्य देवदेवस्य विष्णोः सद्गुणशालिनः ॥ ३० ॥

---

[1] पूर्वकैर्बुधैः [2] सिसृक्षया. [3] विश्वसिद्धानां. [4] तिरोभावः. [5] जले.

*इत्यतो-क.

[1]दयिताहं सदा देवी नित्यं तद्धर्मधर्मिणी ॥ ३१ ॥
ईश्वरीं सर्वभूतानां पद्माक्षी पद्ममालिनी । ३२ ॥
नायिका सर्वशक्तीनां सर्वलोकमहेश्वरी ॥ ३४ ॥
महिषी देवदेवस्य सर्वकामदुघा विभोः ।
तुल्या गुणवयोरूपैर्मनः[2]प्रमथनैर्हरेः ॥ ३५ ॥
करोमि सकलं कृत्यं नित्यं तद्धर्मधर्मिणी ।
साऽहमङ्कस्थिता विष्णोर्देवदेवस्य शार्ङ्गिणः ॥ ३६ ॥
लालिता तेन चात्यन्तं सामरस्यैमुपेयुषी ॥'' ३७ ॥

**सप्तविंशे** ''कर्मणा मनसा वाचा देवदेवं जनार्दनम् ।
प्रपन्नः शरणं शश्वन्मां च तद्धर्मधर्मिणीम् ॥'' ४१ ॥

**अष्टाविंशे** ''लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपया ।
रक्षकः सर्वसिद्धान्ते वेदान्तेऽपि च गीयते ॥'' २४ ॥
इत्यादि ।

एवं श्रुतिस्मृत्यागमवचनैर्देव्याः सर्वेश्वरत्वं सिद्धम् । तच्चाव्याहतेच्छं सर्वनियन्तृत्वम् । तदपि सर्वेषां सत्तास्थितिप्रवृत्तिप्रयोजकसंकल्पाश्रयत्वं इति सर्वकारणत्वसर्वान्तर्यामित्वसर्वशरीरत्वादिसंवलितम् ।

---

**पा.** [1]दयिताहं सदा देवी ज्ञानानन्दमयी परा ।
अनवद्याऽनवद्याङ्गी नित्यं तद्धर्मधर्मिणी ॥

[2] प्रमथने हरेः

एवं श्रियोऽपि सर्वेश्वरत्वे भगवतो देव्याश्च पृथक्पृथक् जगत्स्रष्टृत्वमोक्षप्रदत्वादिकमिति शंकापरिहारार्थं "अस्येशाना" इत्यादिश्रुतौ पत्नीत्वनिर्देशः । यथा लोके पत्युः पत्न्याश्च न पृथक् यागानुष्ठानं, अपि तु सहैव, तथा प्रकृतेऽपि न पतिमात्रस्य पत्नीमात्रस्य च जगत्स्रष्टृत्वमोक्षप्रदत्वादिकं; किन्तु परस्परसहितयोरेवेत्युक्तं भवति । अतः सृष्ट्यादिजगद्व्यापारस्य यज्ञत्वं निरूपितं भवति ॥

*इदं तु परमरहस्यं

[1]"अकारेणोच्यते विष्णुः सर्वलोकेश्वरो हरिः ।
उद्धृता विष्णुना लक्ष्मीरुकारेणोच्यते तथा ॥
मकारस्तु तयोर्दास इति प्रणवलक्षणम् ॥" इति **कठश्रुतौ**

भगवतः अकारवाच्यत्वं, सर्वलोकेश्वरत्वं च प्रतिपाद्य, देव्याः उकारवाच्यत्वं †सादृश्यार्थकतथेति निर्देशात् सर्वलोकेश्वरत्वं प्रतिपादितम् । अनन्तरं "मकारस्तु तयोर्दास" इत्यनेन मकारवाच्यजीवस्य उभयनिरूपितं दासत्वं प्रतिपन्नम् । तच्च शेषत्वप्रतिपत्त्यर्हत्वे सति इष्टविनियोगार्हत्वरूपं शेषत्वं; तत्प्रतिसंबन्धि स्वामित्वं; तदपि ममेदमिति प्रतिपत्त्यर्हत्वे सति शेषित्वं; तच्च विभूतिद्वयजन्यातिशयभाक्त्वरूपं; तच्च शेषित्वमुभयत्र व्यासक्तं एकं; "तयोर्दास" इति द्वन्द्वश्रुतिस्वारस्यात् । तत्र द्वन्द्वसमासादेवोभयोः समप्राधान्यं परस्परसाहित्यं च सिद्धम् । शेषित्वगर्भमीश्वरत्वम् । शेषित्वं स्वामित्वमिति पर्यायः ।

---

[1] कठश्रुतौ **पा.** *इदं –ग. † सादृश्यार्थकतयेति-क.

अथवा "मकारस्तु तयोर्दास" इति जीवानां दासत्वावगमात्, दास-त्वप्रतिसंबन्धि स्वामित्वं दंपत्योरवगतम्। [1]"स्वामिन्नैश्वर्ये"[†]इति भगवता पाणिनिनाऽनुशासनात्। तथा च व्यासक्तशेषित्वेश्वरत्वपरेयं श्रुतिरहिर्बुद्न्यसंहितावचनेनोपबृंहिता। यथा

"लक्ष्म्याः समस्ताश्चिदचित्प्रपञ्चो व्याप्यस्तदीशस्य तु साऽपि सर्वं।
तथाऽपि साधारणमीशितृत्वं श्रीश्रींशयोर्द्वौ च सदैकशेषी" इति ॥

तस्यायमर्थः चिदचिदात्मकः सर्वप्रपञ्चः लक्ष्म्याः शेषभूतः। सा च देवी [च] भगवच्छेषभूता। यद्यपि भगवदपेक्षयोभयोः शेषत्वमेकरूपं वक्त-व्यम्, तथाऽपि देव्याः सर्वेश्वरत्वप्रतिपादकश्रुतिस्मृत्यादिबहुप्रमाण-विरोधात् स्वतः शेषत्वाभावे सिद्धे, ऐच्छिकशेषत्वमादाय पर्यवस्यति। प्रपञ्चविषये तु बाधकाभावात्, स्वाभाविकशेषत्वम्। एवं देवीप्रपञ्चयो-वैषम्यसूचकः 'तथाऽपि' इति शब्दः। 'साधारणमीशितृत्वं'–'साधा-रणमेकं' इति पर्यायत्वादुभयगतमीश्वरत्वं व्यासक्तमेकं, शेषित्वमिति व्यासक्तमेकं एकवचननिर्देशादिति। उक्तं च श्रीराममिश्रैः [2]"उभ-याधिष्ठानं चैकं शेषित्वं" इति। एवं व्यासक्तशेषित्वेश्वरत्वपरेयं श्रुतिरिति भावः। तदभिप्रायेण [3]"एकः शास्ता" इत्येकत्ववादः उप-पद्यते। एवं देव्याः सर्वभूतेश्वरत्वे न किंचित्संकटमित्यलमतिविस्तरेण*॥

॥ ९ ॥

---

[1] [2] षडर्थसंक्षेपे. [3] पा. * ४३ पृष्ठे 'श्रियं-श्री श्रय' इत्यारभ्य एतावत्पर्यन्तं न-ग. [3†]इति पाणिनिना–ग.

कामानां दर्शमे वाचमाकूतीनां च सत्यताम् ।
समृद्धीनां च सत्यत्वं यशसश्च प्रजायते ॥

**मनसः काममाकूतिं वाचस्सत्यमशीमहि ।**
**पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥**

**मनसः कामं**-मनसा काम्यमानमर्थजातम् । **आकूतिं** *अभिप्रायगतिं मनोरथपरिकल्पितमर्थं; †**वाचः** संबन्धी, वाचा याच्यमानम् सर्वप्रकाराभिलषितमर्थं । **पशूनां रूपं**-जीवधनसमृद्धिम् । **अन्नस्य**—अदनीयस्य; **रूपं**—रूप्यते प्रकाश्यतेऽनेनेति रूपं; अन्नसमृद्धिहेतुभूतं सर्वम् । **सत्यं**—अवितथं यथावस्थितलक्ष्मीप्रसादं; **अशीमहि**-‡अभिलभेमहि । किं च सा **श्रीः**, **मयि**—लक्ष्मीचरणकमलयुगलपरिचरणपरे, पूर्वोक्तमर्थजातं §तत्समृद्धिं प्रथितं **यशश्च श्रयताम्**—प्रापयताम् । अन्तर्भावितण्यर्थोऽयम् । ¶एतेषां भगवदधीनत्वं एषा ऋक् प्रतिपादयति । [1]"आकूतीनामधिपतिं चेतसां च—संकल्पजूतिं देवं विपश्चिम् । मनोराजानमिह वर्धयन्तः । उपहवेऽस्य सुमतौ स्याम ।"

एषा ऋक् भगवतो हृषीकेशत्वं प्रपञ्चयन्ती मनोरथपरिकल्पितानामर्थानामपि भगवानेव प्रापक इति दर्शयति ।

---

1 पा. *अभिप्रायगतं-घ. †वाचः सिद्धिं-ख.
‡अभिलषेमहि-ख. §तत्समृद्धिभुतं प्रथितं श्रयतां-प्रापयतामित्यर्थः-ख.
¶या तेषां...प्रतिपादयन्ती-क.

[1]"यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम" इति जगत्समृद्ध्यादिकं भगवानिव श्रीरपि विदधातीति भगवता पराशरेणोपबृंहितमिति ॥

॥१०॥

अवतीर्णा †जगत्यर्थं कर्दमस्य गृहे रमा ।
या तामेकादशे लक्ष्मीं तन्मुखेनार्थयत्यसौ ॥

**कर्दमेन प्रजाभूता मयि संभव कर्दम ।**
**श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥**

***कर्दमेन** इति । इति ह स्माहुः

[2]"क्षीरोदार्णवसंभूतां श्रियं ‖चोवाह कर्दमः ।
प्रजात्वेन तदा ‡विप्रः तदा प्रभृति कर्दमः ॥

हे **कर्दम** प्रजापते, **कर्दमेन** त्वया, **प्रजाभूता**-प्रजात्वेन स्वीकृता । [3]'अभूततद्भावे च्विः'इत्यादिना ¶च्विः । ईत्त्वाभावः छान्दसः । या पुत्रीत्वेन स्वीकृता तां **श्रियम्** । **मयि**--श्रीसमाराधके **संभव**-§संभावय । किं च हे कर्दम, त्वत्पुत्रीं **श्रियं, मे कुले**—लक्ष्मीचरणारविन्द-परिचरणपरस्य मम पुत्रपौत्रज्ञाति$संबन्ध्यादिष्वपि **वासय**—नित्य-निवासिनीं कुरु । तामेव विशिनष्टि **मातरम्**-सर्वभूतजननीत्वादस्माक-मपि जननीम्, **पद्ममालिनीं**-पद्ममालालंकृतां सौन्दर्यलावण्याद्याकारतया

---

[1] वि.पु. १-८-१७. [2] वि.पु. ९-१. [3] **पा.** †जगत्तत्वं...मुखे.... । ...तन्मुखेनापि याचते–ख. *कर्दमेनेति इति न–क. ‖जग्राह–अ. ‡ लक्ष्मीं...कर्दमी–ख. ¶ च्विप्रत्ययः । ईत्त्वाभावः–ग. § संभावय–समुद्भावयेत्यर्थः–ख. $ संबन्धिवादिष्वपि–क.

सर्वाह्लादकारिणीं श्रियं; "मालाधारिणी" इति तन्मन्त्रे; अस्य मन्त्रस्य कर्दमो देव इति केचिद्वदन्ति। तदपार्थकम्। सर्वस्यास्य सूक्तस्य श्रीदेवताकत्वात। लक्ष्मीपितृत्वेन कर्दमं प्रति प्रार्थना, न देवतात्वेन। अन्यदैवत्येऽपि मन्त्रे संवन्धान्तरप्रसक्तान्यपि दैवतानि प्रार्थ्यानि महान्ति; तथा च स्मरन्ति [1]"मन्त्रेऽन्यदैवते यानि विद्यन्ते तत्प्रसङ्गतः। सालोक्यात्साहचर्याद्वा तानि नैयत्यकानि तु॥" इति।

॥ ११ ॥

§चिक्लीतं श्रीगृहद्वास्थं तत्पत्यायतनान्यपः।
श्रीशेषा द्वादशेनैताः स्वार्थं द्दढयतेऽर्थवत्॥

**आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।**
**नि च देवीं मातरं श्रियं वासय मे कुले॥ १२॥**

¶**आपः** भगवदायतनभूताः। स्निग्धानां—आज्यतैलमधुप्रभृतीनां कारणभूता याः ता आपः। तानि **स्निग्धानि**—आज्यादीनि, **मम गृहे सृजन्तु**—उत्पादयन्तु। हे **चिक्लीत**—भगवदन्तःपुरद्वाररक्षक; **मे**—लक्ष्मीचरणांभोजभक्तस्य मम **गृहे**, तद्भवनद्वार इव, **वस**—नित्यं सन्निहितो भव। चिक्लीतो नाम भगवदन्तःपुरद्वाररक्षकः। तथा च पौराणिकाः पठन्ति [2]"पद्मो गदो निधिः शंखश्चतुर्दन्ती गजस्तथा। कल्याणसर्पपञ्चास्याश्चिक्लीतो गृहरक्षकाः॥" इति।

---

1 2 §श्रीगृहद्वारिवस्त–तस्या आयतनान्यपि। श्रीशेषाद्वादशेनैतान्–ख. ¶आपः सृजन्तु इत्यादि–ख.

किं च हे *चिक्लीत, **देवीं**–द्योतनशीलां; **मातरं**-अखिललोकजननीं अस्मज्जननीं; **श्रियं**–सर्वसमाश्रयणीयां, **मम कुले**–अस्मत्पुत्रपौत्रादिके **निवासय च**–अस्मत्कुलसमृद्धिं च त्वमेव संवर्धयेत्यर्थः ॥ ॥१२॥

देवासुरमनुष्याद्यैर्यष्टव्यां पद्मवासिनीम् ।
त्रयोदशे पुनर्देवीं लक्ष्मीं प्रार्थयते हरेः ॥

**आर्द्रां पुष्करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।**
**चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममाऽऽवह ॥ १३ ॥**

**आर्द्रां**–दयार्द्रहृदयतया तापत्रयतप्तान् प्राणिनो दृष्ट्वा दूयमानचेतस्तया तान् स्वकटाक्षामृतैरभिवर्षन्तीम् । **पुष्करिणीं**–पुष्करवतीं; श्रीनिलयकर्णिकोदरनिवासिनीं [1]"श्रीनिलयधृतकरकमलवरयुत" इत्यादि तन्मन्त्रे । **यष्टिं**–यजिक्रियास्वरूपां, परमयागभूतां; यष्टव्यां वा । **पिङ्गलां**—भगवच्छायानवधारणीयशीतलमनोहराह्लादकरदिव्यवर्णाम् । **पद्ममालिनीं**-दिव्यरूपोद्भूतपद्ममालालंकृतां; "श्रीनिलयमालाधारिणी" इति तन्मन्त्रे । **चन्द्रां हिरण्मयीं** इत्यादेः पूर्ववत् योजना । अत्रापि जातवेदःशब्देन श्रियः पतिमेव संबोधयति ॥ ॥१३॥

आदरातिशयेनैव पूर्वोक्तामविशेषतः ।
चतुर्दशे पुनः प्राह द्वयं तत्सर्वरक्षकम् ॥

---

* चिक्लीते-ख.

**आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।**
**सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममाऽऽवह ॥ १४ ॥**

अत्र 'पुष्टिं' 'सुवर्णां' 'सूर्यां' 'हेममालिनीं' इति एतन्मात्रो विशेषः । अन्यत्सर्वं पूर्ववत् ॥

**पुष्टिं**—अखिलसमृद्धिरूपाम् । **सुवर्णां**—अनुकूल*प्रतिकूलभीषणरमणीयाप्राकृतदिव्यरूपाम् । **सूर्यां**—सर्वेश्वरवत् सकलचेतनाचेतनव्यापनभरणनियमनशीलां । †सुष्ठु ईरयन्ती इति सूर्यां; ताम् । [1]"राजसूयसूर्य" इत्यादिना निपातः । [2]"सूर्य आत्मा जगतस्तस्थुषश्च" इति । पुष्टिमिति प्राप्यत्वमुक्तम् । सुवर्णामिति प्रापकत्वमिति विशेषः ॥ ॥ १४ ॥

अन्तिमेनाद्यसूक्तार्थतात्पर्यातिशयात् पुनः ।
अनन्यगामिनीं देवीं संनियच्छन्नियच्छति ॥

**तां म ‡आवह जातवेदो लक्ष्मीमनपगामिनीम् ।**
**यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्**
**विन्देयं पुरुषानहम् ॥ १५ ॥**

---

[1] अष्टा. ३-१-११४. [2] तै. सं. १-४-४३ *प्रतिकूलाभीषण—क.
†स्रष्टुः—क. ‡ममावह—

अयमत्र विशेषः । **प्रभूतं**—पूर्वोक्तकुप्याकुप्यजीवधनदासीदासादिकमशेषधनजातं यस्यां प्रभूतं प्रधानेश्वरेश्वर्यां प्रणिपातप्रसन्नायामखिललोकनन्दिन्यां अस्मज्जनन्यां, **प्रभूतं**—निरवधिकातिशयम् । **विन्देयं**—लभेयम् । **तां**-सर्वप्रदानपर्याप्तसमृद्धिमतीं करुणास्नानतमुखीं सर्वेश्वरेश्वरीं श्रियं स्वचरणारविन्दपरिचर्यैकविनोदे[1] मयि; **जातवेदः**—श्रियःपते! **अनपगामिनीं**—अन्यत्र सर्वत्राप्यपगमनशंकारहिता, (तां) यथा तथा स्वज्ञानबलशक्तिक्षमादयासौहार्दादिसर्वकल्याणगुणैस्तव दास्यैकरसे मयि संनिधापय ॥ ॥१५॥

एवमेतत्सूक्तोक्तसकलार्थजातं जानतां अनेनार्चनहोमजपतर्पणादिकं कुर्वतां तस्याः प्रसन्नपावनकान्ति[2]शान्त्याकरवदनारविन्दनिवेशितमनोनयनबुद्धीनां तच्चरणारविन्दभजनयजनमननस्मरणकीर्तनवन्दनादिपरममङ्गलाचरणानां भगवत्पादांभोजविन्यस्तसमस्तभराणामनन्यभावानां तच्छरणवरणचारित्रचरणानां पुरुषाणामैहिकमामुष्मिकं वा [3]भोगजातं साक्षात्परमपदाधिष्ठातृभूतपरमपुरुषचरणारविन्द[†]नित्यकैङ्कर्यरसिकपरमसूरि[‡]परिषन्महिष्ठतादिकमपि सकलं सुलभमिति सकलश्रुतिस्मृतीतिहासपुराणसिद्धान्तः ॥

---

[1] विनोदने–क. [2] शान्त्याकार–क. [3] तच्छरणवरणपवित्रचरित्राणां–घ. चारित्रपराणां ऐहिकामुष्मिकं वा पुरुषार्थ जातं परमपद–ख.

[†]नित्यैकरसिक–ख. [‡]परिषन्मनीषितादिकमपि सुलभमिति सकलश्रुतिस्मृतीतिहासादिसिद्धान्तः–ख.

¶यतीन्द्रमाहानसिकात् प्रणतार्तिहरात् गुरोः ।
सत्संप्रदायसिद्धोऽर्थः श्रीसूक्तस्य विनिश्चितः ॥
*श्रीमहालक्ष्मिदासीये सर्वशास्त्रार्थनिर्णये ।
§श्रीमच्छ्रीसूक्तभाष्येऽस्मिन् रमध्वं भूसुरोत्तमाः ॥

---

$श्रीरङ्गनाथमुनिविरचितं श्रीसूक्तभाष्यं समाप्तम् ॥

॥ हरिः ओं ॥

---

¶अयं श्लोको न–ख *महालक्ष्मीशदासीये–ख, ग.
§श्रीसूक्तभाष्ये वक्ष्येऽस्मिन् क्षमध्वं पुरुषोत्तमाः–ख.
$श्रीगोमठरङ्गनाथ विरचितं–ख.

# श्रीसूक्तम्
# ŚRĪSŪKTAṂ

[Sri Sukta is a hymn of fifteen verses in praise of the Goddess Sri or Lakshmi and is a 'Khila Rik' (supplemental hymn) of the Rig Veda. The first two are addressed to Jatavedah (Narayana) and request him to bring Sri to the devotee. The third and the fourth are invocations to Sri herself and by the fifth, the devotee does the 'Prapatti.' By the next five, he prays for the removal of all evil and ignorance, and for the gift of learning and wealth and fame. The next two request the father and attendant of Sri to make Her dwell in his house. The last three are, as in the opening verses, addressed to Jatavedah requesting him to bring Lakshmi to him.]

हरिः ओं ॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥

1. O Jatavedah[1]! Bring unto me (the Goddess) Lakshmi of golden hue[2], who is the destroyer of the sins[3] (of her devotees), who is (resplendent) with her garlands of (lotuses of) gold and silver, who is the delight[4] (of the universe) and who has plenty of (wealth in the form of) gold, etc.

R = Ranganatha. S = Sayana. P = Prthvidhara.

1. Lord Narayana who has abundant wealth, all of his own acquisition.—R.
   Agni (God of Fire)—S. & P.
2. who is benevolent and charming.—R.
3. attractive like the doe.
4. refulgent and charming like the moon—S. & P.

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥

2. O Jatavedah! Bring unto me that Lakshmi[1] who will never leave me and by whose grace I may obtain gold and cattle, and horses and servants[2].

1. One who has auspicious signs indicative of wealth which is prayed for by all.—R.
2. sons, friends and servants.—S.

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥

3. I invoke Goddess[1] Sri[2] who has the All-Pervading (Vishnu) before her, who resides in the heart of souls, (or on the chest of Narayana) and who wakes up (first) at the call (for help) of the elephants (and other beings in distress).

(Or) I invoke Sri who has the cavalry in front (in her march) and the chariots in the middle and who wakes up (daily) by the cry of the elephants attending on her. May she be benign towards me.

1. The resplendent or the sportive Goddess who diverts Herself by the creation, etc. of the world.—R.
2. who is in the form of an army.—S. & P.

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीं ।
पद्मे स्थितां पद्मवर्णां त्वामिहोपह्वये श्रियं ॥ ४ ॥

4. I invoke Sri[1] who is bliss[2] itself, who is sweet-smiling, who resides in a hall of gold[3], who is compassionate, or drenched[4] (on account of her rising from the Milky Ocean or being bathed by the attending elephants), who is effulgent, who is pleased (because of Her association with Her consort or by the worship of Her devotees), who pleases (all by granting their desires), and who dwells in the lotus and is lotus-coloured.

1. who is the prop of all beings.—R.
2. of indescribable greatness or Brahman itself.—S. In the form of Vani (Goddess of speech).—P.
3. of golden hue or form.—S.
4. born in the constellation of Ardra.—S.

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनेमिं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५॥

5. I take refuge in Sri who is delightful (to those who take refuge in Her), who has a shining form, who shines with the fame (of protecting those who seek Her), who is worshipped by the Gods (for getting their ends accomplished) or who is loved by Narayana, who is bounteous in Her gifts, and who has the lotus for Her weapon[2] (to remove the distress of, and to shower favours

on, Her devotees.) May the Alakshmi[3] go away from me, I[4] invoke you, O Lakshmi.

1. all pervading.—P.
2. who is in the form of a lotus. 'ī' is one of the names of Lakshmi.—S.
3. Nescience or the non-existence of the knowledge of Brahman.—R.
4. 'aham' is found in all the northern versions of the Ṛk and in some of the south. Sayana is of opinion that it is an interpolation.

आदित्यवर्णे तपसोऽधिजातो
वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु
मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥

6. Lakshmi of sun-like lustre[1]! The auspicious Bilva tree was generated by your penance[2]. May the fruits of that tree destroy through (our) penance[3] (viz. chanting their names and worshipping them) (our) ignorance[4] (or nescience), obstacles[5] (to the worship and service of you) and extraneous things (which are not related to you).

1. whose lustre was got from 'a' (Bhagavan).—R.
2. for (you to perform) penance (under it).—P.
by your will. R. & S.
3. by (your) favour.—S.
4. ma & ya—two words : ma—towards & ya—which.-P.
5. ignorance pertaining to the organs of sense, both internal and external.—S.
inauspicious things—both internal and external.—P.

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ ७॥

7. O Goddess[1]! May the reputation[2] (of being learned) come to me along with gems[3]. I am born in this world and may you give me fame and plenty.

1. Devasakhah—(Kúbera) the friend of (Maha)deva.–S.&P.
2. The daughter of Daksha—Sati (the consort of Siva).—S.
3. with Manibhadra—an attendant of Kubera—S. with cintamani (the divine gem)—P.

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वान् निर्णुद मे गृहात् ॥ ८ ॥

8. I destroy (by your grace) the Alakshmi, who is impure, who is the elder (of Lakshmi), and who is (the cause of) hunger and thirst. Dispel from my house all lack of wealth and of prosperity.

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥

9. I invoke Sri, to realise whom fragrant things (like sandal-paste, flowers, etc.) are the means[1], who is unassailable[2] by the inauspicious, who is ever-joyful[3] and the possessor of (wealth in the form of) manure (because of the

**abundance of cattle She has), and who is the Supreme sovereign of all (living) beings.**

1. Who is the means of bringing fame to Her devotees.—R.
   (Lakshmi, in the form of the Goddess Earth whose distinguishing feature is smell.—S.
2. unattainable by those who do not seek her with auxiliaries to worship and with devotion.—R.
3. who has an abundance of crops.—S.

मनसः काममाकूतिं वाचस्सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥

10. May we realise all (the) wishes of (our) hearts and (our) aims, the truth of (our) words (in the form of requests), the wealth of cattle and food. May Sri bring me fame (also).

कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥

11. (O Kardama!) Bring to me Sri, who has been taken as a daughter[1] by Kardama (i. e., yourself) and make Her dwell in my family—Her, who is the (Universal) Mother[2] and who is decked with garlands of lotuses.

1. who has (Kardama) for Her son.—S. & P.
2. (your) mother—S. &. P.

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥

12. O Ciklita[1]! Let the waters[2] (which are the dwelling places of the Lord) generate (for me) viscous things (like ghee and others). Dwell in my house and make the Goddess Sri, the Mother (of the Universe) also live in my abode.

1. One of the personal attendants of Lakshmi. The name of Manmatha, the son of Sri.
2. deities presiding over the waters.—S.

आर्द्रां पुष्करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममाऽऽवह ॥ १३ ॥

13. O Jatavedah! Bring to me Lakshmi who is compassionate, who resides in the lotus pond[1], who is the goal of (all) sacrificial rites[2], who is tawny-coloured, who has garlands of lotuses, who delights[3] (the Universe), and who has an abundance (of wealth in the form) of gold.

1. who has elephants around Her with their trunks lifted ready to pour water on Her for Her bath.—S.
2. who is the punisher (of the delinquent).—S.
3. who is lustrous like the moon.—R.

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममाऽऽवह ॥ १४ ॥

14. O Jatavedah! Bring unto me Lakshmi, who is compassionate, who resides in the lotus-pond, who is prosperity (itself), who is of a

golden hue[1], who is decked with garlands of gold, who is the (efficient) impeller[2] (of the Universe) and who is of golden form.

1. who is of an agreeable hue.—S.
2. who is wealth itself.—P.

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्
विन्देयं पुरुषानहम् ॥ १५ ॥

15. O Jatavedah! Bring to me Lakshmi who will never, abandon me and by whose grace I may get in abundance gold and cattle, servants and horses and (other) men.

———

# चतुः श्लोकी
# CHATUHŚLOKĪ

[Ṣri Yamunacarya — otherwise known as Sri Alavandar—is the forerunner and spiritual Guru of Ramanuja. He is the author of Mahapurusha Nirnaya, Agamapramanya and Siddhitraya (Atma, Samvit and Isvara Siddhi)—scholarly works of a rather argumentative nature. His Stotra Ratna is a song overflowing with devotion to the Lord. He has written in his own lucid and melodious style another hymn in four verses called Catussloki on Goddess Lakshmi. The four verses say that Lakshmi also has the four qualities which are attributed to Her consort Narayana in the four chapters of the Brahma Sutras. They are: i. He is the cause, efficient and material, of the whole universe; ii. His greatness is unsullied by anything; iii. He is the means by which one has to obtain the highest goal, the supreme bliss and iv. it is Himself. Lakshmi also has these.

The first Sloka speaks about the Vibhutis of Goddess Lakshmi, the second about Her greatness which is incomprehensible even to Her omniscient Consort, the third about Her grace which grants the different wishes of all and the last speaks about Her charming forms which are ever inseparable from, and co-existent with, those of Sri Narayana. The Stotras of the Acaryas who came after, have been based more or less upon this and they elucidate the idea contained herein.]

कान्तस्ते पुरुषोत्तमः फणिपतिः शय्याऽऽसनं वाहनं
वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहिनी ।
ब्रह्मेशादिसुरव्रजः सदयितस्त्वद्दासदासीजनः
श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम् ॥ १ ॥

1. O Goddess! Purushottama, the greatest Lord of all Souls, (is) your consort; the Lord of the hooded (serpents, Adisesha) (is) your couch and throne; the sovereign of the birds, (Garuda) whose body Vedas are, (is) your vehicle; Maya, the world-enchantress (i. e., Prakriti, composed of the three qualities of Sattva, Rajas and Tamas) (is) your veil; all the hosts of Gods with their sweethearts (are) your bevy of attendants and maids. Your name itself is Sri. (Possessed of all this greatness, as you are), how can we (adequately) sing your praise?

यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभुः
नालं मातुमियत्तया निरवधिं नित्यानुकूलं स्वतः ।
तां त्वां दास इति प्रपन्न इति च स्तोष्याम्यहं निर्भयो
लोकैकेश्वरि लोकनाथदयिते दान्ते दयां ते विदन् ॥२॥

2. Your greatness, which is boundless, eternal and ever blissful by nature, cannot be comprehended in its entirety even by your Loving Consort, omnipotent though He be, even as He cannot His own greatness. O the Supreme

Sovereign of the Universe! The Beloved of the Saviour of the Universe! I know you shower your mercy on those who seek refuge in you and so I fearlessly begin to sing (the greatness of) you. For I am both your servant and Prapanna (i.e., refugee).

ईषत्त्वत्करुणानिरीक्षणसुधासन्धुक्षणात् रक्ष्यते
नष्टं प्राक्तदलाभतः त्रिभुवनं संप्रत्यनन्तोदयं ।
श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते
संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् ॥ ३ ॥

3. Being blessed by the grace of a particle of the nectar of your merciful glances, the three worlds, non-existent before because of its absence, are saved (i.e., placed free from all troubles) now and are endowed with endless prosperity. For without the grace of the Darling of the heart of the Lotus-eyed (Narayana), the joy is never possible for the souls anywhere—in this world, in the Kaivalya and in the path of Vishnu (i.e., salvation).

शान्तानन्तमहाविभूति परमं यद्ब्रह्म रूपं हरेः
मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भुतम् ।
यान्यन्यानि यथासुखं विहरतो रूपाणि सर्वाणि ता-
न्याहुः स्वैरनुरूपरूपविभवैः गाढोपगूढानि ते ॥ ४ ॥

4. With your wealth, splendour and forms suited to His own are inseparably united, they

say, all His forms: that aspect of His which is free from any modification, which is unlimited, which is the Lord of the Great Vibhuti and which is called the Para Brahman; that form (of Vishnu) which is called Brahman, which is marvellously charming and hence more liked by Him; and also all the other forms assumed by Him at his own pleasure to divert Himself.

---

[यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥]

# शरणागति गद्यम्

# ŚARAṆĀGATIGADYAM

[Sri Ramanuja was the successor of Sri Yamuna. He popularised the Visishtadvaita System of Philosophy and spread it everywhere so that the system came to be known after him. He is the author of nine works. The Vedanta Sara, the Vedanta Dipa and Sri Bhashya are graded commentaries on the Brahma Sutras with increasing elaborateness. The fourth is the Bhashya on the Bhagavad Gita ; the fifth, the Vedartha Sangraha, is a digest of the teachings of all Upanishads ; the sixth is called Nitya which codifies the daily rites of a devotee of the God ; and the last three are devotional songs in prose, the Gadya traya —Saranagati Gadya, Sriranga Gadya and Vaikuntha Gadya. At the beginning of the Saranagati Gadya and in one or two other places, he has spoken of Sri, though he has not specially devoted a book to Her greatness.]

भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणां पद्मवनालयां भगवतीं श्रियं देवीं नित्यानपायिनीं निरवद्यां देवदेवदिव्यमहिषीं अखिलजगन्मातरं (अस्मन्मातरं) अशरण्यशरण्यां अनन्यशरणः शरणमहं प्रपद्ये ॥

In Sri do I take refuge, helpless as I am, in Sri—who is the saviour of the helpless; who has got innumerable hosts of qualities,—auspicious and unexcelled—like sovereignty and amiability; who possesses a nature, forms, qualities and Vibhuti (splendour) suited to and loved by Sri Narayana, the Bhagavan (Himself, the possessor of such superb qualities); in Sri, the Goddess (of superb qualities), the denizen of the lotus-ponds who is ever inseparable from Her Consort and unimpeachable and unsullied (by any fault); and who is the queen of the Lord of all Gods and the Mother of the entire Universe (and of myself.)

———

[प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम् ।
प्रसाधयति यत्सूक्तिः स्वाधीनपतिकां श्रुतिम् ॥]

# श्रीस्तवः

# ŚRĪSTAVAḤ

[Sri Vatsanka Misra was the loving disciple of Sri Ramanuja and was much loved and held in great esteem by all, both for his knowledge and saintly qualities. His devotion and saintliness were paralleled only by those of the Alvars—who were called as such, because they sank in the ocean of Bhakti to God—and so he also was called Kurattalvan (i. e., Alvan of Kuram, his birthplace near Conjivaram.) He is the author of a work called Yamakaratnakara and of five devotional psalms which go by the name of Panca stava— Sri Stava, Varadaraja Stava, Sundarabahu Stava, Atimanusha Stava and Vaikuntha Stava—all in charming and moving and emotional verses.

56. Mother! You have a great partiality for the Milky Ocean as it is Your place of birth; You cherish the Parama pada (the Kingdom of God) because of Your love for Your Beloved. But You have now forgotten both the Ocean and the Great Cosmic Space (Sri Vaikuntha) and feel quite at home (and happy) in Your mansion at Sriranga as it gives You opportunity to save people (in distress) like me.

औदार्यकारुणिकताश्रितवत्सलत्व-
पूर्वेषु सर्वमतिशायितमत्र मातः ।
श्रीरङ्गधाम्नि यदुतान्यदुदाहरन्ति
सीतावतारमुखमेतदमुष्य योग्यम् ॥५७॥

57. O Mother! All Your qualities like generosity, mercy and affection towards the devotees (or refugees) have been excelled here in the mansion at Sriranga. If they mention Your other incarnations as Sita and the like (in which the qualities had a free play, there is practically nothing noteworthy in them; for) they are only the training ground for this. (In the Arcavatara in Sriranga all those amiable qualities shine to their fullest advantage after all the practice elsewhere.)

ऐश्वर्यमक्षरगतिं परमं पदं वा
कस्मैचित् अञ्जलिभरं वहते वितीर्य ।
अस्मै न किञ्चित् उचितं कृतमित्यथाम्ब
त्वं लज्जसे कथय कोऽयमुदारभावः ॥ ५८ ॥

58. If a person should only raise the burden of his joined hands (in prayer in Your presence), You (are pleased with him beyond measure and) shower on him wealth, Kaivalya (enjoyment of the soul) and Parama Pada (Salvation). (After giving all this) You still feel that he has not been given his deserts (for what he did) and therefore feel ashamed. What magnanimity is this ? Tell me, O Mother!

ज्ञानक्रियाभजनसंपदकिञ्चनोऽहं
इच्छाधिकारशकनानुशयानभिज्ञः ।
आगांसि देवि युवयोरपि दुस्सहानि
बध्नामि मूर्खचरितस्तव दुर्भरोऽस्मि ॥ ५९ ॥

59. Goddess! I am bereft of everything (in the world)—of Karma Yoga (sacrificial rites), Gnana Yoga (Religious meditation) and Bhakti Yoga (Devotion) (or Prapatti) as I am ignorant of my own wants, my qualification, and my ability, and as I do not feel repentent either (for sins committed). Besides I am still hoarding up sins, unpardonable even to You (who are like a Father and Mother). (Thus) because of my own foolish acts I have become intolerable to You (and therefore I am no longer an object of protection).

इत्युक्तिकैतवशतेन विडम्बयामि
तान् अम्ब सत्यवचसः पुरुषान् पुराणान् ।
यद्वा न मे भुजबलं तव पादपद्म-
लाभे त्वमेव शरणं विधितः *कृताऽसि ॥ ६० ॥

60. By hundreds of insincere words (of humility) like these, I imitate the truthful sages of old. (I repeat parrot-like what they poured forth out of love and devotion.) I have no other strength by which I can reach Your lotus-like feet. So by Your own (spontaneous) mercy, Mother, You must be my saviour and also the means for my goal.

श्रीरङ्गे शरदः शतं सह सुहृद्वर्गेण निष्कण्टकं
निर्दुःखं सुसुखं च दास्यरसिकां भुक्त्वा समृद्धिं परां ।
युष्मत्पादसरोरुहान्तररजः स्याम त्वं अम्बा पिता
सर्वं च त्वमपि त्वमेव भव नः स्वीकुर्वकस्मात् कृपाम् ॥६१

61. With our loving friends (and kinsfolk), may we enjoy for a hundred years the Infinite Bliss of the service of You at Sriranga, free from all worries and sorrows, and in great comfort. May we also become the pollen in the heart of Your lotus-like feet. Be a Mother, Father, everyone and all for us. (For this) take up Your spontaneous compassion and save us. (O Mother.)

———

* कुतोऽपि—पा

# श्रीस्तुतिः

# ŚRĪSTUTIḤ

[श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥]

[Sri Stuti is one of the many stotras of Sri Vedanta Desika also called Venkatanatha (1268 A. D.—1369 A. D.) He is perhaps the greatest of the Acaryas among the followers of the Visishtadvaita School of Philosophy by the wealth of his qualities, intellect and accomplishments. He was a true 'Sarva-tantra-svatantra' (Master of all Arts and Sciences) and 'Kavi-tarkika-simha' (easily the greatest of the poets and controversialists). His works, in prose and verse, and in Sanskrit and Tamil, are many and varied, and range from the simplest and sweetest poems to the most difficult works on abstruse metaphysical subjects. His command of language is marvellous. The greatness of his works can be well imagined by the tribute paid to him by Appayya Dikshita, the veteran scholar and polemic of the Advaita School, who wrote a commentary upon Yadavabhyudaya of our author and another, it is said, on his Paduka-sahasra.

Sri Desika was an equally great scholar of Tamil and the author of many poems in chaste and sweet Tamil overflowing with devotion to the Lord. His Rahasya works in the Manipravala style (Sanskrit and Tamil mixed)—beginning with the most elementary 'Tattvapadavi' and 'Rahasya-padavi' and going up to the 'Para-mata-Bhanga' and 'Rahasya Traya Sara,' are like a series of

text-books on the principles of the Visishtadvaita Philosophy and on the meaning of the Three Mantras. These form a complete and extensive literature on the Doctrine of Prapatti (Self-surrender); and that is the greatest service he has done to humanity in general and Visishtadvaitins in particular.

In all he has left 116 works in prose and verse, many original and a few commentaries on the works of previous Acaryas and some on his own. For want of space, I shall just give an analysis of his works according to their different topics and not a complete catalogue. There are: 9 works on Vedanta; 6 on logic and Metaphysics; 34 Rahasyas; 5 Kavyas; one Drama; 4 of a polemic nature; 18 poems in Tamil; 29 Stotras; 3 on rituals; and 7 on diverse subjects like geography and sculpture. Of these 15 are missing completely, and 4 partially, and one, they say, is in manuscript and yet to see the light of print.*

The twenty-nine Stotras are devoted to Vishnu, His incarnations, His consorts, His weapons and His attendants. Sri Stuti which is given below, is one of them and is in praise of Goddess Lakshmi in 25 verses; and the following is an analysis of the contents of the poem:

1—3. Introductory--Invocation to Lakshmi to bless the poet with power to praise Her.

4—9. Greatness of Lakshmi; She and Her Consort are jointly the originators, saviours and masters of the Universe.

10—12. The diverse manifestations of Lakshmi.

* The above classification is based on 'Sri Desika—His Life and Works' of Setlur Sri Narasimhacharya in Tamil and I am indebted to him for it.

13. The Coronation of Lakshmi.

14—19. Munificence of Lakshmi in granting the wishes of those who desire for wealth, for the realisation of the soul or for the attainment of God.

20—22. The poet as the supplicant for Her favour.

23, 24. The poet narrates how he was blessed by Lakshmi.

25. Conclusion.]

मानातीतप्रथितविभवां मङ्गलं मङ्गलानां
वक्षःपीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणस्त्वां शरण्यां प्रपद्ये ॥ १ ॥

1. Sri (or Lakshmi)! You are the auspicious of the auspicious and adorn the throne-like chest of (Vishnu) the Conqueror of Madhu with Your lustre. Your greatness transcends measure and is well-renowned. You are the good incarnate of all the subjects that pray for a greatness cognisable by preception and scriptures. I seek refuge in You, destitute as I am.

आविर्भावः कलशजलधौ अध्वरे वाऽपि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा ।
भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरनवधिगुणा स्तूयसे सा कथं त्वम् ॥ २ ॥

2. Goddess! (Once) You rose from the Milky Ocean and (later) from the (Hall of) sacrifice (of Janaka); the cluster of lotuses and the broad chest of Vishnu are Your halls of residence. The entire Universe coupled with the Divine Cosmic Space (Nitya Vibhuti) is Your great wealth. You are great in every way and endowed with endless qualities; and (so) how can the shallow-minded (like myself) praise You?

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वामनितरगतिः स्तोतुमाशंसमानः ।
सिद्धारंभः सकलभुवनश्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥ ३ ॥

3. If the (bodied) men praise you, they immediately become praiseworthy (in turn). When I, Who am helpless, wish to sing Your praise, my task becomes (by Your favour) an accomplished fact already and I shall also be extolled by all the world. (Tell me) who is there that will not be benefited even by a wish to serve at Your feet?

यत्सङ्कल्पात् भवति कमले यत्र देहिन्यमीषां
जन्मस्थेमप्रलयरचना जङ्गमाजङ्गमानां ।
तत्कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
पूर्णं तेजः स्फुरति भवतीपादलाक्षारसाङ्कम् ॥४॥

4. Kamala! There is an auspicious and all-pervasive Glory which is the one object on which all the Yogins concentrate their minds, and in which (i.e., Paramatma who has all things as His body and who is the soul of all), by its own volition, the origination, sustentation and reabsorption of the moving and non-moving (objects) take place. That Glory shines marked by the lac on Your feet.

निष्प्रत्यूहप्रणयघटितं देवि नित्यानपायं
विष्णुस्त्वं चेत्यनवधिगुणद्वन्द्वमन्योन्यलक्ष्यं ।
शेषः चित्तं विमलमनसां मौलयश्च श्रुतीनां
संपद्यन्ते विहरणविधौ यस्य शय्याविशेषाः ॥ ५ ॥

5. Goddess! Vishnu and Yourself form a pair united together by an unhindered love and ever inseparable. Both (of You) are endowed with endless qualities and are cognizable, one by the other, by Your mutually defining nature. The Sesha (Serpent), the spotless minds (of Yogins) and the Upanishads (forming the head of the Vedas) serve as excellent resorts (lit. couches) for You in the course of Your Sports.

उद्देश्यत्वं जननि भजतोरुज्झितोपाधिगन्धं
प्रत्यग्रूपे हविषि युवयोरेकशेषित्वयोगात् ।
पद्मे पत्युस्तव च निगमैर्नित्यमन्विष्यमाणो
नावच्छेदं भजति महिमा नर्तयन् मानसं नः ॥ ६ ॥

6. Mother Padma! (In the Nyasa yagna,) the soul is offered as an oblation to You and Your Consort, and You are the deities that should receive it directly (without an intermediary); for You are jointly the Masters. This greatness of Your Lord and Yourself, though sought for by the Vedas incessantly, never comes within their concept and it makes our hearts dance with joy

पश्यन्तीषु श्रुतिषु परितः सूरिबृन्देन सार्धं
मध्येकृत्य त्रिगुणफलकं निर्मितस्थानभेदं ।
विश्वाधीशप्रणयिनि सदा विभ्रमद्यूतवृत्तौ
ब्रह्मेशाद्या दधति युवयोरक्षशारप्रचारम् ॥ ७ ॥

7. The Beloved of the Paramount Sovereign of the Universe! When You and Your Consort are engaged eternally in a game of dice for Your sport, the Vedas (like ladies) together with the hosts of the Divine Angels stand around and observe. In it, the Prakriti composed of the three qualities (of Sattva, Rajas and Tamas) is the chess-board kept in the centre, the different worlds (of Indra, Brahma and others) are the chequers, and Brahma, Siva and others act as the dice for You. (The creation of the world is Your sport and all the deities are but Your creatures.)

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधितनया विष्णुपत्नीन्दिरेति ।
यन्नामानि श्रुतिपरिपणान्येवमावर्तयन्तो
नावर्तन्ते दुरितपवनप्रेरिते जन्मचक्रे ॥ ८ ॥

8. You have taken to Mukunda as Your resort and You are the Sovereign of the world. Your names like 'Lakshmi,' 'Padma,' 'the Daughter of the (Milky) Ocean,' 'Vishnupatni' and 'Indira' are like the capital amount of the Vedas. Those who repeat them (in prayer) never again whirl in the wheel of birth (and death) which is turned by the winds of sins. (Her names are like the reserve capital, and so the Vedas do not draw on them and speak only about the Lord who is like the current amount in actual transaction.)

त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
किं तैरन्तःकलहमलिनैः किञ्चिदुत्तीर्य मग्नैः ।
त्वत्संप्रीत्यै विहरति हरौ संमुखीनां श्रुतीनां
भावारूढौ भगवति युवां दम्पती दैवतं नः ॥ ९ ॥

9. Some hold You are the Ruler of the Universe and others Your Beloved. Of what use are those people, torn by mutually conflicting opinions? For they get drowned finally (in the ocean of ignorance) though they raise their heads a bit. But our Supreme Deities are You two forming the Couple. The Vedas that speak about Hari, and about His sports as means to Your

pleasure, have for their final goal and purport only both of You, Goddess.

आपन्नार्तिप्रशमनविधौ बद्धदीक्षस्य विष्णोः
आचख्युस्त्वां प्रियसहचरीमैकमत्योपपन्नाम् ।
प्रादुर्भावैरपि समतनुः प्राध्वमन्वीयसे त्वं
दूरोत्क्षिप्तैरिव मधुरता दुग्धराशेस्तरङ्गैः ॥ १० ॥

10. Vishnu is under a vow to remove the distress of the suffering (humanity) and they say You are His Beloved companion endowed with a unanimity of opinion. As the waves of the Milky Ocean are inseparable from their sweetness and so follow it wherever it goes even to distant places far receding from the shore, Vishnu in all His incarnations goes after Your suitable forms in an agreeable manner.

धत्ते शोभां हरिमरकते तावकी मूर्तिराद्या
तन्वी तुङ्गस्तनभरनता तप्तजाम्बूनदाभा ।
यस्यां गच्छन्त्युदयविलयैः नित्यमानन्दसिन्धौ
इच्छावेगोल्लसितलहरीविभ्रमं व्यक्तयस्ते ॥ ११ ॥

11. That slender primaeval form of Yours, lovely like the purified (molten) gold and slightly bent by the weight of Your elevated bosoms, adds beauty to the emerald-like person of Vishnu. In this form which is like an Ocean of Bliss, the origination and reabsorption of all Your manifestations take place eternally caused by the force

of Your will, like the waves (that rise and vanish on the surface of the ocean).

आसंसारं विततमखिलं वाङ्मयं यद्विभूतिः
यद्भ्रूभङ्गात् कुसुमधनुषः किङ्करो मेरुधन्वा ।
यस्यां नित्यं नयनशतकैरेकलक्ष्यो महेन्द्रः
पद्मे तासां परिणतिरसौ भावलेशैस्त्वदीयैः ॥ १२ ॥

12. Sarasvati has for Her wealth all the vast world of speech ever since the beginning of the Universe; by the mere knitting of the eye-brows of Parvati, the Meru-bowed (Siva) became, almost a servant of the flower-bowed (Manmatha); and Indrani is the cynosure of all the thousand eyes of Indra. This greatness (that is found) in all the three is but the result of Your least will, Padma.

अग्रे भर्तुः सरसिजमये भद्रपीठे निषण्णां
अंभोराशेरधिगतसुधासंप्लवादुत्थितां त्वां ।
पुष्पासारस्थगितभुवनैः पुष्कलावर्तकाद्यैः
क्लृप्तारंभाः कनककलशैरभ्यषिञ्चन् गजेन्द्राः ॥ १३ ॥

13. You rose from the Milky Ocean which was rich with the nectar (that came before You), and adorned a throne of lotuses in front of Your Consort. Then the lordly elephants bathed You with (water from) the golden vases being led by the clouds like Pushkalavartaka that flooded the Universe with a rain of flowers.

आलोक्य त्वाममृतसहजे विष्णुवक्षःस्थलस्थां
शापाक्रान्ताः शरणमगमन् सावरोधाः सुरेन्द्राः ।
लब्ध्वा भूयः त्रिभुवनमिदं लक्षितं त्वत्कटाक्षैः
सर्वाकारस्थिरसमुदयां संपदं निर्विशन्ति ॥ १४ ॥

14. Sister (lit., twin-born) of nectar! The chiefs of the Gods saw You enthroned on the bosom of Vishnu, and with their consorts sought refuge in You distressed by the curse (of Durvasas). Then they got back the three worlds enriched by Your (benevolent) glances and enjoyed the wealth which began to flourish unchecked ever since.

आर्तत्राणव्रतिभिरमृतासारनीलाम्बुवाहैः
अंभोजानामुषसि मिषतामन्तरङ्गैरपाङ्गैः ।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस्त्वदीया
तस्यां तस्यामहमहमिकां तन्वते संपदोघाः ॥ १५ ॥

15. The floods of affluence vie with one another in rushing to that quarter where Your eyes play with their glances—Your eyes which have taken the vow of saving the destitute, which are (cool) like the blue clouds showering nectar, and which much resemble the lotuses opening with the rise of the early dawn.

योगारंभत्वरितमनसो युष्मदैकान्त्ययुक्तं
धर्मं प्राप्तुं प्रथममिह ये धारयन्ते धनायां ।
तेषां भूमेर्धनपतिगृहात् अम्बरादम्बुधेर्वा
धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम् ॥ १६ ॥

16. There are some people in the world who are eager to begin the practice of (Karma) Yoga, and in order to carry it out and (at the same time) preserve the virtue of being devoted to You in a single-hearted manner, they long for wealth (only from You). Towards them, the wealth rushes forth in torrents from the Earth, or the Palace of Kubera, or the sky, or from the Ocean in quantities far exceeding their wishes.

श्रेयस्कामाः कमलनिलये चित्रमाम्नायवाचा
चूडापीडं तव पदयुगं चेतसा धारयन्तः ।
छत्रच्छायासुभगशिरसः चामरस्मेरपार्श्वाः
श्लाघाशब्दश्रवणमुदिताः स्रग्विणः सञ्चरन्ति ॥ १७ ॥

17. Lotus-mansioned (Lakshmi)! Persons desirous of Beatitude just meditate in their hearts upon Your feet that are like the diadem on the heads of the Vedas (Upanishads). Anon they begin to move about with all the (royal) insignia: pairs of chowries are smiling on either side; an umbrella over the head is adding dignity to them; their ears are pleased to hear eulogistic

words; and their bodies are adorned by garlands of flowers. O wonder! (Over and above the realisation of their wants to get salvation, they enjoy wealth in this world also.)

ऊरीकर्तुं कुशलमखिलं जेतुमादीनरातीन्
दूरीकर्तुं दुरितनिवहान् त्यक्तुमाद्यामविद्यां ।
अम्ब स्तम्बावधिकजननग्रामसीमान्तरेखां
आलम्बन्ते विमलमनसो विष्णुकान्ते दयां ते ॥ १८ ॥

18. The Beloved of Vishnu! The spotless-minded devotees look to Your Mercy which is like the boundary line that marks the end of the series of births coming down to that of a 'Stamba' (the smallest germ), and pray to You to get all prosperity, to curb the greatest foes (like covetousness and anger), to remove the hosts of sins and to dispel the primaeval Nescience.

जाताकाङ्क्षा जननि युवयोरेकसेवाधिकारे
मायालीढं विभवमखिलं मन्यमानास्तृणाय ।
प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते
वेलाभङ्गप्रशमनफलं वैदिकं धर्मसेतुम् ॥ १९ ॥

19. Mother! The blessed, who wish to do single-minded devotion to both of You, treat with contempt (lit. as trash) all the wealth of the world sprung from the Maya (of God). And for the pleasure of You and Vishnu they observe the laws laid down by the Vedas which act ends in avoiding the transgression of the limits of the Dharmic code of the Vedas.

सेवे देवि त्रिदशमहिलामौलिमालार्चितं ते
सिद्धिक्षेत्रं शमितविपदां संपदां पादपद्मं ।
यस्मिन् ईषन्नमितशिरसो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ २० ॥

20. Goddess! I salute Your lotus-like feet which the Goddesses worship with their garland-like heads, and which are like the fountain of affluence free from all misfortunes. Blessed are they that bend their heads at Your feet though slightly, for at the end of their lives, they cast off their mortal frames and go to dwell in the kingdom of God Vasudeva which is devoid of Tamas.

सानुप्रासप्रकटितदयैः सान्द्रवात्सल्यदिग्धैः
अम्ब स्निग्धैरमृतलहरीलब्धसब्रह्मचर्यैः ।
घर्मे तापत्रयविरचिते गाढतप्तं क्षणं मां
आकिञ्चन्यग्लपितमनघैरार्द्रयेथाः कटाक्षैः ॥ २१॥

21. Your lovely glances pregnant with cordial affection, express Your unceasing mercy and partake of the nature of nectareous waves. By Your pure and loving glances drench me, even if it be for a moment, as I am scorched by the heat caused by the threefold miseries (relating to the body, to the world and to fate) and withered by helplessness.

संपद्यन्ते भवभयतमीभानवः त्वत्प्रसादात्
भावाः सर्वे भगवति हरौ भक्तिमुद्वेलयन्तः ।
याचे किं त्वामहमिह यतः शीतलोदारशीला
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥२२॥

22. By Your grace all thoughts rise in my mind overflowing with devotion towards the Lord Hari and they are like suns in dispelling the dark fears of the mundane existence. Further with Your highly amiable and munificent nature, You are showering on me again and again heaps of good fortunes. So what more can I beg of You now?

माता देवि त्वमसि भगवान् वासुदेवः पिता मे
जातः सोऽहं जननि युवयोरेकलक्ष्यं दयायाः ।
दत्तो युष्मत्परिजनतया देशिकैरप्यतस्त्वं
किं ते भूयः प्रियमिति किल स्मेरवक्त्रा विभासि ॥२३॥

23. You are my Mother, O Goddess, and Vasudeva is my Father. Therefore, Mother, I have become the one object of the compassion of You (both). Further I have been dedicated for Your Service by my masters. (Thus I have been blessed in all ways.) Still You seem to ask me, with a sweet smile glistening on Your lips, 'what more shall I give?' Thus You shine.

कल्याणानामविकलनिधिः काऽपि कारुण्यसीमा
नित्यामोदा निगमवचसां मौलिमन्दारमाला ।
संपद् दिव्या मधुविजयिनः सन्निधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थनाकामधेनुः ॥ २४ ॥

24. Lakshmi is the inexhaustible treasure of auspiciousness and the utmost limit of indescribable compassion. She is the Eternal Bliss and adorns, like a garland of Mandara flowers, the heads of the Vedas (Upanishads). She is (again) the Divine wealth of (Vishnu) the conqueror of Madhu, and is the Kamadhenu (the all-yielding Divine Cow) in granting the wishes of all (the people in) the world. May that Lakshmi dwell for ever in my heart!

उपचितगुरुभक्तेरुत्थितं वेङ्कटेशात्
कलिकलुषनिवृत्त्यै कल्पमानं प्रजानां ।
सरसिजनिलयायाः स्तोत्रमेतत् पठन्तः
सकलकुशलसीमासार्वभौमा भवन्ति ॥ २५ ॥

25. This Stotra of the Lotus-mansioned (Lakshmi) has risen from Venkatesa who has a full-grown devotion to Acaryas and it is capable of dispelling the faults of the Kali Age in all persons. Those that read this Stotra of Lakshmi will become paramount sovereigns and enjoy the highest happiness and prosperity.

[कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥]

# श्री विष्णुपुराणे प्रथमांशे

## अष्टमो-नवमोऽध्यायः

## अष्टमोऽध्यायः

**श्रीपराशरः**— .... .... ....

देवौ धातृविधातारौ भृगोः ख्यातिरसूयत।
श्रियं च देवदेवस्य पत्नी नारायणस्य या ॥ १५ ॥

**मैत्रेयः**—क्षीरोदात् श्रीः समुत्पन्ना श्रूयतेऽमृतमन्थने ।
भृगोः ख्यात्यां समुत्पन्नेत्येतदाह कथं भवान् ॥ १६ ॥

**श्रीपराशरः**—

नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ॥ १७ ॥
अर्थो विष्णुरियं वाणी नीतिरेषा नयो हरिः ।
बोधो विष्णुरियं बुद्धिः धर्मोऽसौ सत्क्रिया त्वियम् ॥ १८ ॥
स्रष्टा विष्णुरियं सृष्टिः श्रीर्भूमिः भूधरो हरिः ।
सन्तोषो भगवान् लक्ष्मीः तुष्टिर्मैत्रेय शाश्वती ॥ १९ ॥
इच्छा श्रीर्भगवान् कामो यज्ञोऽसौ दक्षिणा तु सा ।
आज्याहुतिरसौ देवी पुरोडाशो जनार्दनः ॥ २० ॥
पत्नीशाला मुने लक्ष्मीः प्राग्वंशो मधुसूदनः ।
[1] चितिर्लक्ष्मीः हरिर्यूपः इध्मा श्रीर्भगवान् कुशः ॥ २१ ॥
सामस्वरूपी भगवान् उद्गीतिः कमलालया ।
स्वाहा लक्ष्मीर्जगन्नाथो वासुदेवो हुताशनः ॥ २२ ॥

शङ्करो भगवान् विष्णुः गौरी लक्ष्मीर्द्विजोत्तम ।
मैत्रेय केशवः सूर्यः तत्प्रभा कमलालया ॥ २३ ॥
विष्णुः पितृगणः पद्मा स्वधा शाश्वतपुष्टिदा ।
द्यौः श्रीः सर्वात्मको विष्णुः अवकाशोऽतिविस्तरः ॥ २४ ॥
शशाङ्कः श्रीधरः कान्तिः श्रीः तस्यैवानपायिनी ।
धृतिर्लक्ष्मीः जगच्चेष्टा वायुः सर्वत्रगो हरिः ॥ २५ ॥
जलधिर्द्विज गोविन्दः तद्वेला श्रीः महामते ।
लक्ष्मीस्वरूपमिन्द्राणी देवेन्द्रो मधुसूदनः ॥ २६ ॥
यमः चक्रधरः साक्षात् [2] धूमोर्णा कमलालया ।
[3] ऋद्धिः श्रीः श्रीधरो देवः स्वयमेव धनेश्वरः ॥ २७ ॥
[4] गौरी लक्ष्मीः महाभाग केशवो वरुणः स्वयम् ।
श्रीर्देवसेना[5] तद्भर्ता देवसेनापतिर्हरिः ॥ २८ ॥
अवष्टम्भो गदापाणिः शक्तिः लक्ष्मीर्द्विजोत्तम ।
काष्ठा लक्ष्मीः निमेषोऽसौ मुहूर्तोऽसौ कला तु सा ॥ २९ ॥
ज्योत्स्ना लक्ष्मीः प्रदीपोऽसौ सर्वं सर्वेश्वरो हरिः ।
लताभूता जगन्माता श्रीः विष्णुः द्रुमसंस्थितिः ॥ ३० ॥
विभावरी श्रीर्दिवसो देवश्चक्रगदाधरः ।
वरप्रदो वरो विष्णुः वधूः पद्मवनालया ॥ ३१ ॥

---

[1] चितिः—इष्टचयं । [2] धूमोर्णा—यमस्य पत्नी । [3] ऋद्धिः—कुबेरस्य पत्नी । [4] गौरी—वरुणस्य पत्नी । [5] देवसेना—स्कन्दभार्या ।

नदस्वरूपी भगवान् श्रीर्नदीरूपसंस्थिता ।
ध्वजश्च पुण्डरीकाक्षः पताका कमलालया ॥ ३२ ॥
तृष्णा लक्ष्मीः जगत्स्वामी लोभो नारायणः परः ।
रती रागश्च धर्मज्ञ लक्ष्मीर्गोविन्द एव च ॥ ३३ ॥
किं वाऽत्र बहुनोक्तेन संक्षेपेणेदमुच्यते ॥ ३४ ॥
देवतिर्यङ्मनुष्येषु पुंनामा भगवान् हरिः ।
स्त्रीनाम्नी श्रीश्च विज्ञेया नानयोर्विद्यते परम् ॥ ३५ ॥

इति अष्टमोऽध्यायः ।

---

## नवमोऽध्यायः

**श्रीपराशरः**--इदं च शृणु मैत्रेय यत्पृष्टोऽहमिह त्वया ।
श्रीसंबन्धं मयाऽप्येतत् श्रुतमासीन्मरीचितः ॥ १ ॥
दुर्वासाः शङ्करस्यांशः चचार पृथिवीमिमां ।
स ददर्श स्रजं दिव्यां ऋषिर्विद्याधरींकरे ॥ २ ॥
सन्तानकानामखिलं यस्या गन्धेन वासितम् ।
अतिसेव्यमभूद्ब्रह्मन् तद्वनं वनचारिणाम् ॥ ३ ॥
उन्मत्तव्रतधृद्विप्रस्तां दृष्ट्वा शोभनस्रजं ।
तां ययाचे वरारोहां विद्याधरवधूं ततः ॥ ४ ॥
याचिता तेन तन्वङ्गी मालां विद्याधराङ्गना ।
ददौ तस्मै विशालाक्षी सादरं प्रणिपत्य तम् ॥ ५ ॥

तामादायात्मनो मूर्ध्नि स्रजमुन्मत्तरूपधृत् ।
कृत्वा स विप्रो मैत्रेय परिबभ्राम मेदिनीम् ॥ ६ ॥

स ददर्श समायान्तं उन्मत्तैरावते स्थितं ।
त्रैलोक्याधिपतिं देवं सह देवैः शचीपतिम् ॥ ७ ॥

तामात्मनः स शिरसः स्रजमुन्मत्तषट्पदां ।
आदायामरराजाय चिक्षेपोन्मत्तवन्मुनिः ॥ ८ ॥

गृहीत्वाऽमरराजेन स्रगैरावतमूर्धनि ।
न्यस्ता रराज कैलासशिखरे जाह्नवी यथा ॥ ९ ॥

मदान्धकारिताक्षोऽसौ गन्धोत्कृष्टेन वारणः ।
करेणाऽऽघ्राय चिक्षेप तां स्रजं धरणीतले ॥ १० ॥

ततश्चुक्रोध भगवान् दुर्वासा मुनिसत्तमः ।
मैत्रेय देवराजानं क्रुद्धश्चैतदुवाच ह ॥ ११ ॥

ऐश्वर्यमददुष्टात्मन् अतिस्तब्धोऽसि वासव ।
श्रियो धामस्रजं यस्त्वं मद्दत्तां नाभिनन्दसि ॥ १२ ॥

प्रसाद इति नोक्तं ते प्रणिपातपुरस्सरं ।
हर्षोत्फुल्लकपोलेन न चापि शिरसा धृता ॥ १३ ॥

मया दत्तामिमां मालां यस्मान्न बहुमन्यसे ।
त्रैलोक्यश्रीरतो मूढ विनाशमुपयास्यति ॥ १४ ॥

मां मन्यतेऽन्यैः सदृशं नूनं शक्र भवान् द्विजैः ।
अतोऽवमानमस्मासु मानिना भवता कृतम् ॥ १५ ॥

मद्दत्ता भवता यस्मात् क्षिप्ता माला महीतले ।
तस्मात् प्रणष्टलक्ष्मीकं त्रैलोक्यं ते भविष्यति ॥ १६ ॥
यस्य सञ्जातकोपस्य भयमेति चराचरम् ।
तं त्वं मामतिगर्वेण देवराजावमन्यसे ॥ १७ ॥

**श्रीपराशरः**–महेन्द्रो वरणस्कन्धात् अवतीर्य त्वरान्वितः ।
प्रसादयामास तदा दुर्वाससमकल्मषम् ॥ १८ ॥
प्रसाद्यमानः स तदा प्रणिपातपुरस्सरं ।
प्रत्युवाच सहस्राक्षं दुर्वासा मुनिसत्तमः ॥ १९ ॥
नाहं कृपालुहृदयो न च मां भजते क्षमा ।
अन्ये ते मुनयः शक्र दुर्वाससमवेहि माम् ॥ २० ॥
गौतमादिभिरन्यैस्त्वं गर्वमारोपितो मुदा ।
अक्षान्तिसारसर्वस्वं दुर्वाससमवेहि माम् ॥ २१ ॥
वसिष्ठाद्यैर्दयासारैः स्तोत्रं कुर्वद्भिरुच्चकैः ।
गर्वं गतोऽसि येनैवं मामप्यद्यावमन्यसे ॥ २२ ॥
ज्वलज्जटाकलापस्य भ्रुकुटीकुटिलं मुखम् ।
निरीक्ष्य कस्त्रिभुवने मम यो न गतो भयम् ॥ २३ ॥
नाहं क्षमिष्ये बहुना किमुक्तेन शतक्रतो ।
विडम्बनामिमां भूयः करोष्यनुनयात्मिकाम् ॥ २४ ॥

**श्रीपराशरः**–इत्युक्त्वा प्रययौ विप्रो देवराजोऽपि तं पुनः ।
आरुह्यैरावतं नागं प्रययावमरावतीम् ॥ २५ ॥

ततः प्रभृति निःश्रीकं सशक्रं भुवनत्रयम् ।
मैत्रेयाऽऽसीदपध्वस्तं संक्षीणौषधिवीरुधम् ॥ २६ ॥

न यज्ञाः संप्रवर्तन्ते न तपस्यन्ति तापसाः ।
न च दानादिधर्मेषु मनश्चक्रे तदा जनः ॥ २७ ॥

निस्सत्त्वाः सकला लोका लोभाद्युपहतेन्द्रियाः ।
स्वल्पेऽपि हि बभूवुस्ते साभिलाषा द्विजोत्तम ॥ २८ ॥

यतः सत्त्वं ततो लक्ष्मीः सत्त्वं भूत्यनुसारि च ।
निःश्रीकाणां कुतः सत्त्वं विना तेन गुणाः कुतः ॥ २९ ॥

बलशौर्याद्यभावश्च पुरुषाणां गुणैर्विना ।
लङ्घनीयः समस्तस्य बलशौर्यविवर्जितः ॥ ३० ॥

भवत्यपध्वस्तमतिर्लङ्घितः प्रथितः पुमान् ।
एवमत्यन्तनिःश्रीके त्रैलोक्ये सत्त्ववर्जिते ॥ ३१ ॥

देवान् प्रति बलोद्योगं चक्रुर्दैतेयदानवाः ॥३२॥

लोभाभिभूता निःश्रीका दैत्याः सत्त्वविवर्जिताः ।
श्रिया विहीनैर्निःसत्त्वैः देवैश्चक्रुस्ततो रणम् ॥ ३३ ॥

विजिताः त्रिदशा दैत्यैः इन्द्राद्याः शरणं ययुः ।
पितामहं महाभागं हुताशनपुरोगमाः ॥ ३४ ॥

यथावत् कथितो देवैः ब्रह्मा प्राह ततः सुरान् ।
परापरेशं शरणं व्रजध्वमसुरार्दनम् ॥ ३५ ॥

उत्पत्तिस्थितिनाशानामहेतुं हेतुमीश्वरम् ।
प्रजापतिपतिं विष्णुं अनन्तमपराजितम् ॥ ३६ ॥
प्रधानपुंसोरजयोः कारणं कार्यभूतयोः ।
प्रणतार्तिहरं विष्णुं स वः श्रेयो विधास्यति ॥ ३७ ॥

**श्रीपराशरः**—एवमुक्त्वा सुरान् सर्वान् ब्रह्मा लोकपितामहः ।
क्षीरोदस्योत्तरं तीरं तैरेव सहितो ययौ ॥ ३८ ॥
स गत्वा त्रिदशैः सर्वैः समुपेतः पितामहः ।
तुष्टाव वाग्भिरिष्टाभिः परापरपतिं हरिम् ॥ ३९ ॥

**ब्रह्मोवाच**—नमामि सर्वं सर्वेशमनन्तमजमव्ययम् ।
लोकधामधराधारं अप्रकाशमभेदिनम् ॥ ४० ॥
नारायणमणीयांसमशेषाणामणीयसां ।
समस्तानां गरिष्ठं च भूरादीनां गरीयसाम् ॥ ४१ ॥
यत्न सर्वं यतः सर्वं उत्पन्नं मत्पुरःसरं ।
सर्वभूतश्च यः प्रोक्तः पराणामपि यः परः ॥ ४२ ॥
परः परस्मात् पुरुषात् परमात्मस्वरूपधृत् ।
योगिभिश्चिन्त्यते योऽसौ मुक्तिहेतोर्मुमुक्षुभिः ॥ ४३ ॥
सत्त्वादयो न सन्तीशे यतश्च प्राकृता गुणाः ।
स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु ॥ ४४ ॥
कला काष्ठा निमेषादिकालसूत्नस्य गोचर ।
यस्य शक्तिर्न शुद्धस्य प्रसीदतु स नो हरिः ॥ ४५ ॥

प्रोच्यते परमेशोऽजो यः शुद्धोऽप्युपचारतः ।
प्रसीदतु स नो विष्णुरात्मा यः सर्वदेहिनाम् ॥ ४६ ॥
यः कारणं च कार्यं च कारणस्यापि कारणम् ।
कार्यस्यापि च यः कार्यं प्रसीदतु स नो हरिः ॥ ४७ ॥
कार्यकार्यस्य यत्कार्यं तत्कार्यस्यापि यः स्वयं ।
तत्कार्यकार्यभूतो यः ततश्च प्रणताः स्म तम् ॥ ४८ ॥
कारणं कारणस्यापि तस्य कारणकारणम् ।
तत्कारणानां हेतुं तं प्रणताः स्म सुरेश्वरम् ॥ ४९ ॥
भोक्तारं भोज्यभूतं च स्रष्टारं सृज्यमेव च ।
कार्यकर्तृस्वरूपं तं प्रणताः स्म परं पदम् ॥ ५० ॥
विशुद्धबोधवन्नित्यमजमक्षयमव्ययम् ।
अव्यक्तमविकारं यत् तद्विष्णोः परमं पदम् ॥ ५१ ॥
न स्थूलं न च सूक्ष्मं यत् न विशेषणगोचरम् ।
तत्पदं परमं विष्णोः प्रणमाम सदाऽमलम् ॥ ५२ ॥
यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता ।
परब्रह्मस्वरूपस्य प्रणमामस्तमव्ययम् ॥ ५३ ॥
यद्योगिनः सदोद्युक्ताः पुण्यपापक्षयेऽक्षयं ।
पश्यन्ति प्रणवे चिन्त्यं तद्विष्णोः परमं पदम् ॥ ५४ ॥
यत्र देवा न मुनयो न चाहं न च शङ्करः ।
जानन्ति परमेशस्य तद्विष्णोः परमं पदम् ॥ ५५ ॥

शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवात्मिकाः ।
भवन्त्यभूतपूर्वस्य तद्विष्णोः परमं पदम् ॥ ५६ ॥
सर्वेश सर्वभूतात्मन् सर्व सर्वाश्रयाच्युत ।
प्रसीद विष्णो भक्तानां व्रज नो दृष्टिगोचरम् ॥ ५७ ॥

**श्रीपराशरः**—इत्युदीरितमाकर्ण्य ब्रह्मणस्त्रिदशास्ततः ।
प्रणम्योचुः प्रसीदेति व्रज नो दृष्टिगोचरम् ॥ ५८ ॥
यन्नायं भगवान् ब्रह्मा जानाति परमं पदम् ।
तन्नताः स्म जगद्धाम तव सर्वगताच्युत ॥ ५९ ॥
इत्यन्ते वचसस्तेषां देवानां ब्रह्मणस्तदा ।
ऊचुर्देवर्षयः सर्वे बृहस्पतिपुरोगमाः ॥ ६० ॥
आद्यो यज्ञः पुमानिज्यो यः पूर्वेषां च पूर्वजः ।
तं नताः स्म जगत्स्रष्टुः स्रष्टारमविशेषणम् ॥ ६१ ॥
भगवन् भूतभव्येश यज्ञमूर्तिधराव्यय ।
प्रसीद प्रणतानां त्वं सर्वेषां देहि दर्शनम् ॥ ६२ ॥
एष ब्रह्मा सहास्माभिः सह रुद्रैः त्रिलोचनः ।
सर्वादित्यैः समं पूषा पावकोऽयं सहाग्निभिः ॥ ६३ ॥
अश्विनौ वसवश्चैव सर्वे चैते मरुद्गणाः ।
साध्या विश्वे तथा देवा देवेन्द्रश्चायमीश्वरः ॥ ६४ ॥
प्रणामप्रवणा नाथ दैत्यसैन्यपराजिताः ।
शरणं त्वामनुप्राप्ताः समस्ता देवतागणाः ॥ ६५ ॥

**श्रीपराशरः** —एवं संस्तूयमानस्तु भगवान् शंखचक्रधृत् ।
जगाम दर्शनं तेषां मैत्रेय परमेश्वरः ॥ ६६ ॥

तं दृष्ट्वा ते तदा देवाः शंखचक्रगदाधरं ।
अपूर्वरूपसंस्थानं तेजसां राशिमूर्जितम् ॥ ६७ ॥

प्रणम्य प्रणताः पूर्वं सन्तोषस्तिमितेक्षणाः ।
तुष्टुवुः पुण्डरीकाक्षं पितामहपुरोगमाः ॥ ६८ ॥

**देवाः** —नमो नमोऽविशेषस्त्वं त्वं ब्रह्मा त्वं पिनाकधृत् ।
इन्द्रस्त्वमग्निः पवनो वरुणः सविता यमः ॥ ६९ ॥

वसवो मरुतः साध्या विश्वेदेवगणा भवान् ।
योऽयं तवाग्रतो देव समस्तो देवतागणः ।
सर्वमेव जगत्स्रष्टा यतः सर्वगतो भवान् ॥ ७० ॥

त्वं यज्ञस्त्वं वषट्कारः त्वमोङ्कारः प्रजापतिः ।
वेत्ता वेद्यं च सर्वात्मन् त्वन्मयं चाखिलं जगत् ॥ ७१ ॥

त्वामार्ताः शरणं विष्णो प्रयाता दैत्यनिर्जिताः ।
वयं प्रसीद सर्वात्मन् तेजसाऽऽप्याययस्व नः ॥ ७२ ॥

तावदार्तिस्तथा वाञ्छा तावन्मोहस्तथाऽसुखं ।
यावन्न याति शरणं त्वामशेषाघनाशनम् ॥ ७३ ॥

त्वं प्रसादं प्रसन्नात्मन् प्रपन्नानां कुरुष्व नः ।
तेजसां नाथ सर्वेषां स्वशक्त्याऽऽप्यायनं कुरु ॥ ७४ ॥

**श्रीपराशरः**—एवं संस्तूयमानस्तु प्रणतैरमरैर्हरिः ।
प्रसन्नदृष्टिर्भगवान् इदमाह स विश्वकृत् ॥ ७५ ॥

तेजसो भवता देवाः करिष्याम्युपबृंहणं ।
वदाम्यहं यत्क्रियतां भवद्भिस्तदिदं सुराः ॥ ७६ ॥

आनीय सहिता दैत्यैः क्षीराब्धौ सकलौषधीः ।
मन्थानं मन्दरं कृत्वा योक्त्रं कृत्वा च वासुकिम् ॥ ७७ ॥

मथ्यताममृतं देवाः सहाये मय्यवस्थिते ॥ ७८ ॥

सामपूर्वं च दैतेयाः तत्र सामान्यकर्मणि ।
सामान्यफलभोक्तारो यूयं वाच्या भविष्यथ ॥ ७९ ॥

मथ्यमाने च तत्राब्धौ यत्समुत्पद्यतेऽमृतं ।
तत्पानात् बलिनो यूयं अमराश्च भविष्यथ ॥ ८० ॥

तथा चाहं करिष्यामि यथा ते त्रिदशद्विषः ।
न प्राप्स्यन्त्यमृतं देवाः केवलं क्लेशभागिनः ॥ ८१ ॥

**श्रीपराशरः**—इत्युक्ता देवदेवेन सर्व एव ततः सुराः ।
सन्धानमसुरैः कृत्वा यत्नवन्तोऽमृतेऽभवन् ॥ ८२ ॥

नानौषधीः समानीय देवदैतेयदानवाः ।
क्षिप्त्वा क्षीराब्धिपयसि शरदभ्रामलत्विषि ॥ ८३ ॥

मन्थानं मन्दरं कृत्वा योक्तं कृत्वा च वासुकिं ।
ततो मथितुमारब्धा मैत्रेय तरसाऽमृतम् ॥ ८४ ॥

विबुधाः सहिताः सर्वे यतः पुच्छं ततः कृताः ।
कृष्णेन वासुकेर्दैत्याः पूर्वकाये निवेशिताः ॥ ८५ ॥
ते तस्य मुखनिःश्वासवह्निनोपहतत्विषः ।
निस्तेजसोऽसुराः सर्वे बभूवुरमितौजसः ॥ ८६ ॥
तेनैव मुखनिःश्वासवायुनाऽस्तं वलाहकैः ।
पुच्छप्रदेशे वर्षद्भिः तथा चाप्यायिताः सुराः ॥ ८७ ॥
क्षीरोदमध्ये भगवान् कूर्मरूपी स्वयं हरिः ।
मन्दराद्रेरधिष्ठानं भ्रमतोऽभून्महामुने ॥ ८८ ॥
रूपेणान्येन देवानां मध्ये चक्रगदाधरः ।
चकर्ष नागराजानं दैत्यमध्ये परेण च ॥ ८९ ॥
उपर्याक्रान्तवान् शैलं बृहद्रूपेण केशवः ।
तथाऽपरेण मैत्रेय यन्न दृष्टं सुरासुरैः ॥ ९० ॥
तेजसा नागराजानं तथाऽऽप्यायितवान् हरिः ।
अन्येन तेजसा देवानुपबृंहितवान् प्रभुः ॥ ९१ ॥
मथ्यमाने ततस्तस्मिन् क्षीराब्धौ देवदानवैः ।
हविर्धाम अभवत् पूर्वं सुरभिः सुरपूजिता ॥ ९२ ॥
जग्मुर्मुदं तदा देवा दानवाश्च महामुने ।
व्याक्षिप्तचेतसश्चैव बभूवुः स्तिमितेक्षणाः ॥ ९३ ॥
किमेतदिति सिद्धानां दिवि चिन्तयतां ततः ।
बभूव वारुणी देवी मदघूर्णितलोचना ॥ ९४ ॥

कृतावर्तात् ततस्तस्मात् क्षीरोदात् वासयन् जगत् ।
गन्धेन पारिजातोऽभूत् देवस्त्रीनन्दनस्तरुः ॥ ९५ ॥
रूपौदार्यगुणोपेताः ततश्चाप्सरसां गणः ।
क्षीरोदधेः समुत्पन्नो मैत्रेय परमाद्भुतः ॥ ९६ ॥
ततः शीतांशुरभवत् जगृहे तं महेश्वरः ।
जगृहुश्च विषं नागाः क्षीरोदाद्धि समुद्भवम् ॥ ९७ ॥
ततो धन्वन्तरिर्देवः श्वेताम्बरधरः स्वयं ।
बिभ्रत् कमण्डलुं पूर्णममृतस्य समुत्थितः ॥ ९८ ॥
ततः स्वस्थमनस्कास्ते सर्वे दैतेयदानवाः ।
बभूवुर्मुदिताः सद्यो मैत्रेय मुनिभिः सह ॥ ९९ ॥
ततः स्फुरत्कान्तिमती विकासिकमले स्थिता ।
श्रीर्देवी पयसस्तस्मात् उत्थिता धृतपङ्कजा ॥ १०० ॥
तां तुष्टुवुर्मुदा युक्ताः श्रीसूक्तेन महर्षयः ॥ १०१ ॥
विश्वावसुमुखास्तस्या गन्धर्वाः पुरतो जगुः ।
घृताचीप्रमुखा ब्रह्मन् ननृतुश्चाप्सरोगणाः ॥ १०२ ॥
गङ्गाद्याः सरितस्तोयैः स्नानार्थमुपतस्थिरे ।
दिग्गजा हेमपात्रस्थमादाय विमलं जलम् ।
स्नापयाञ्चक्रिरे देवीं सर्वलोकमहेश्वरीम् ॥ १०३ ॥
क्षीरोदो रूपधृत् तस्यै मालामम्लानपङ्कजां ।
ददौ विभूषणान्यङ्गे विश्वकर्मा चकार ह ॥ १०४ ॥

दिव्यमालाम्बरधरा स्नाता भूषणभूषिता ।
पश्यतां सर्वदेवानां ययौ वक्षःस्थलं हरेः ॥ १०५ ॥
ततोऽवलोकिता देवाः हरिवक्षःस्थलस्थया ।
लक्ष्म्या मैत्रेय सहसा परां निर्वृतिमागताः ॥ १०६ ॥
उद्वेगं परमं जग्मुर्दैत्या विष्णुपराङ्मुखाः ।
त्यक्ता लक्ष्म्या महाभाग विप्रचित्तिपुरोगमाः ॥ १०७ ॥
ततस्ते जगृहुर्दैत्या धन्वन्तरिकरस्थितं ।
कमण्डलुं महावीर्या यत्रास्ते तत् द्विजामृतम् ॥ १०८ ॥
मायया लोभयित्वा तान् विष्णुः स्त्रीरूपसंस्थितः ।
दानवेभ्यस्तदादाय देवेभ्यः प्रददौ हरिः ॥ १०९ ॥
ततः पपुः सुरगणाः शक्राद्यास्तत् तदाऽमृतं ।
उद्यतायुधनिस्त्रिंशा दैत्यास्तांश्च समभ्ययुः ॥ ११० ॥
पीतेऽमृते च बलिभिः देवैर्दैत्यचमूस्तथा ।
वध्यमाना दिशो भेजे पातालं च विवेश ह ॥ १११ ॥
ततो देवा मुदा युक्ताः शंखचक्रगदाधरं ।
प्रणिपत्य यथापूर्वं अशासंस्तत् त्रिविष्टपम् ॥ ११२ ॥
ततः प्रसन्नभाः सूर्यः प्रययौ स्वेन वर्त्मना ।
ज्योतींषि च यथामार्गं प्रययुर्मुनिसत्तम ॥ ११३ ॥
जज्वाल भगवांश्चोच्चैः चारुदीप्तिर्विभावसुः ।
धर्मे च सर्वभूतानां तदा मतिरजायत ॥ ११४ ॥

श्रिया जुष्टं च त्रैलोक्यं बभूव द्विजसत्तम ।
शक्रश्च त्रिदशश्रेष्ठः पुनः श्रीमानजायत ॥ ११५ ॥
सिंहासनगतः शक्रः संप्राप्य त्रिदिवं पुनः ।
देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः ॥ ११६ ॥

**इन्द्र उवाच**—नमामि सर्वलोकानां जननीमब्धिसंभवां ।
श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थिताम् ॥ ११७ ॥
पद्मालयां पद्मकरां पद्मपत्रनिभेक्षणां ।
वन्दे पद्ममुखीं देवीं पद्मनाभप्रियामहम् ॥ ११८ ॥
त्वं सिद्धिः त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी ।
सन्ध्या रात्रिः प्रभा भूतिः मेधा श्रद्धा सरस्वती ॥ ११९ ॥
यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥ १२० ॥
आन्वीक्षकी त्रयी वार्ता दण्डनीतिस्त्वमेव च ।
सौम्यासौम्यैर्जगद्रूपैः त्वयैतद्देवि पूरितम् ॥ १२१ ॥
का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः ।
अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः ॥ १२२ ॥
त्वया देवि परित्यक्तं सकलं भुवनत्रयं ।
विनष्टप्रायमभवत् त्वयेदानीं समेधितम् ॥ १२३ ॥
दाराः पुत्रास्तथाऽगारसुहृद्धान्यधनादिकं ।
भवत्येतन्महाभागे नित्यं त्वद्वीक्षणात् नृणाम् ॥ १२४ ॥

शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखं ।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥ १२५ ॥
त्वं माता सर्वलोकानां देवदेवो हरिः पिता ।
त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम् ॥ १२६ ॥
मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदं ।
मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥ १२७ ॥
मा पुत्रान् मा सुहृद्वर्गान् मा पशून् मा विभूषणं ।
त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलालये ॥ १२८॥
सत्येन शौचसत्याभ्यां तथा शीलादिभिर्गुणैः ।
त्यज्यन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयाऽमले ॥ १२९ ॥
त्वयावलोकिताः सद्यः शीलाद्यैः सकलैर्गुणैः ।
धनैश्वर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि ॥ १३० ॥
स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
स शूरः स च विक्रान्तो यं त्वं देवि निरीक्षसे ॥१३१॥
सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ।
पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ १३२ ॥
न ते वर्णयितुं शक्ता गुणान् जिह्वाऽपि वेधसः ।
प्रसीद देवि पद्माक्षि माऽस्मांस्त्याक्षीः कदाचन ॥१३३ ॥

**श्रीपराशरः**—एवं श्रीः संस्तुता संयक् प्राहादृश्या शतक्रतुं ।
पश्यतां सर्वदेवानां सर्वभूतस्थिता द्विज ॥ १३४ ॥

**श्रीरुवाच**— परितुष्टाऽस्मि देवेश स्तोत्रेणानेन ते हरे ।
वरं वृणीष्व यस्त्विष्टो वरदाऽहं तवाऽऽगता ॥ १३५ ॥

**इन्द्र उवाच**—वरदा यदि मे देवि वरार्हो यदि चाप्यहं ।
त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥१३६॥
स्तोत्रेण यस्त्वथैतेन त्वां स्तोष्यत्यब्धिसंभवे ।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥ १३७ ॥

**श्रीरुवाच**—त्रैलोक्यं त्रिदशश्रेष्ठ न सन्त्यक्ष्यामि वासव ।
दत्तो वरो मयाऽयं ते स्तोत्राराधनतुष्टया ॥ १३८ ॥
यश्च सायं तथा प्रातः स्तोत्रेणानेन मानवः ।
मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मुखी ॥१३९॥

**श्रीपराशरः**—एवं ददौ वरौ देवी देवराजाय वै पुरा ।
मैत्रेय श्रीर्महाभागा स्तोत्राराधनतोषिता ॥ १४० ॥
भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः ।
देवदानवयत्नेन प्रसूताऽमृतमन्थने ॥ १४१ ॥
एवं यदा जगत्स्वामी देवदेवो जनार्दनः ।
अवतारं करोत्येषा तदा श्रीस्तत्सहायिनी ॥ १४२ ॥
पुनश्च पद्मा संभूता ह्यादित्योऽभूद्यदा हरिः ।
यदा च भार्गवो रामः तदाऽभूद्धरणी त्वियम् ॥ १४३ ॥
राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेषाऽनपायिनी ॥ १४४ ॥

देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुम् ॥१४५॥


यस्त्वेतच्छृणुयात् जन्म लक्ष्म्या यश्च पठेन्नरः ।
श्रियो न विच्युतिस्तस्य गृहे यावत्कुलत्रयम् ॥ १४६ ॥

पठ्यते येषु चैवैषा गृहेषु श्रीकथा मुने ।
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥ १४७ ॥

एतत् ते कथितं सर्वं यन्मां त्वं परिपृच्छसि ।
क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥ १४८ ॥

इति सकलविभूत्यवाप्तिहेतुः
स्तुतिरियमिन्द्रमुखोद्गता हि लक्ष्म्याः ।
अनुदिनमिह पठ्यते नृभिर्यैः
वसति न तेषु कदाचिदप्यलक्ष्मीः ॥ १४९ ॥

———



श्रीः

# श्रीलक्ष्म्यष्टोत्तर शतनाम स्तोत्रम्

# ŚRĪLAKṢMYAṢṬOTTARA ŚATANĀMA STOTRAM

**देव्युवाच**—देवदेव महादेव त्रिकालज्ञ महेश्वर ।
करुणाकर देवेश भक्तानुग्रहकारक ॥
अष्टोत्तरशतं लक्ष्म्याः श्रोतुमिच्छामि तत्त्वतः ॥

**ईश्वर उवाच**—देवि साधु महाभागे महाभाग्यप्रदायकं ।
सर्वैश्वर्यकरं पुण्यं सर्वपापप्रणाशनम् ॥
सर्वदारिद्र्यशमनं श्रवणात् भक्तिमुक्तिदम् ।
राजवश्यकरं दिव्यं गुह्यात् गुह्यतरं परम् ॥
दुर्लभं सर्वदेवानां चतुःषष्टिकलास्पदम् ।
पद्मादीनां वरान्तानां निधीनां नित्यदायकम् ॥
समस्तदेवसंसेव्यं अणिमाद्यष्टसिद्धिदं ।
किमत्र बहुनोक्तेन देवीप्रत्यक्षदायकम् ॥
तव प्रीत्याऽद्य वक्ष्यामि समाहितमनाः शृणु ॥
अष्टोत्तरशतस्यास्य महालक्ष्मीस्तु देवता ।
क्लीं बीजं पदमित्युक्तं शक्तिस्तु भुवनेश्वरी ।
अङ्गन्यासकरन्यासः स इत्यादि प्रकीर्तितः ॥

ध्यानं—वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्याममभयप्रदां मणिगणैर्नानाविधैर्भूषितां ।
भक्ताभीष्टफलप्रदां हरिहरब्रह्मादिभिः सेवितां
पार्श्वे पङ्कजशङ्खपद्मनिधिभिर्युक्तां सदा शक्तिभिः ॥

सरसिजनिलये सरोजहस्ते
धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे
त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥

ओं ॥ प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदां ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम् ॥ १ ॥
वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधां ।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम् ॥ २ ॥
अदितिं च दितिं दीप्तां वसुधां वसुधारिणीं ।
नमामि कमलां* कान्तां कामाक्षीं क्रोधसंभवाम् ॥ ३ ॥
अनुग्रहपदां बुद्धिमनघां हरिवल्लभां ।
अशोकाममृतां दीप्तां लोकशोकविनाशिनीम् ॥ ४ ॥
नमामि धर्मनिलयां करुणां (लोक) वेदमातरं ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुन्दरीम् ॥ ५ ॥
पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम् ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगन्धिनीम् ॥ ६ ॥

* क्षान्तिं क्षमां क्षीरोदसंभवां

पुण्यगन्धां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम् ।
नमामि चन्द्रवदनां चन्द्रां चन्द्रसहोदरीम् ॥ ७॥
चतुर्भुजां चन्द्ररूपां इन्दिरामिन्दुशीतलाम् ।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम् ॥ ८ ॥
विमलां विश्वजननीं तुष्टिं दारिद्र्यनाशिनीम् ।
प्रीतिपुष्करिणीं शान्तां शुक्लमाल्यांबरां श्रियम् ॥ ९ ॥
भास्करीं बिल्वनिलयां वरारोहां यशस्विनीं ।
वसुन्धरामुदाराङ्गां हरिणीं हेममालिनीम् ॥ १० ॥
धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदाम् ।
नृपवेश्मगतानन्दां वरलक्ष्मीं वसुप्रदाम् ॥ ११ ॥
शुभां हिरण्यप्राकारां समुद्रतनयां जयाम् ।
नमामि मङ्गलां देवीं विष्णुवक्षःस्थलस्थिताम् ॥ १२ ॥
विष्णुपत्नीं प्रसन्नाक्षीं नारायणसमाश्रिताम् ।
दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रववारिणीम् ॥ १३ ॥
नवदुर्गां महाकालीं ब्रह्मविष्णुशिवात्मिकाम् ।
त्रिकालज्ञानसंपन्नां नमामि भुवनेश्वरीम् ॥ १४ ॥
लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपाङ्कुराम् ।
श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥

मातर्नमामि कमले कमलायताक्षि
श्रीविष्णुहृत्कमलवासिनि विश्वमातः ।
क्षीरोदजे कमलकोमलगर्भगौरि
लक्ष्मि प्रसीद सततं नमतां शरण्ये ॥

त्रिकालं यो जपेत् विद्वान् षण्मासं विजितेन्द्रियः ।
दारिद्र्यध्वंसनं कृत्वा सर्वमाप्नोति यत्नतः ॥

देवीनामसहस्रेषु पुण्यमष्टोत्तरं शतं ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः ॥

भृगुवारे शतं धीमान् पठेत् वत्सरमात्रकं ।
अष्टैश्वर्यमवाप्नोति कुबेर इव भूतले ॥

दारिद्र्यमोचनं नामस्तोत्रमम्बापरं शतं ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः ।
भुक्त्वा तु विपुलान् भोगान् अस्याः सायुज्यमाप्नुयात् ॥

प्रातःकाले पठेन्नित्यं सर्वदुःखोपशान्तये ।
पठंस्तु चिन्तयेत् देवीं सर्वाभरणभूषिताम् ॥

---

# श्रीलक्ष्म्यष्टोत्तरशतनामावलिः

१ ओं प्रकृत्यै नमः ।
विकृत्यै नमः ।
विद्यायै नमः ।
सर्वभूतहितप्रदायै नमः ।
श्रद्धायै नमः ।
विभूत्यै नमः ।
सुरभ्यै नमः ।
परमात्मिकायै नमः ।
२ वाचे नमः ।
पद्मालयायै नमः । १०
पद्मायै नमः ।
शुचये नमः ।
स्वाहायै नमः ।
स्वधायै नमः ।
सुधायै नमः ।
धन्यायै नमः ।
हिरण्मय्यै नमः ।
लक्ष्म्यै नमः ।
३ ओं नित्यपुष्टायै नमः ।
विभावर्यै नमः । २०
अदित्यै नमः ।
दित्यै नमः ।
दीप्तायै नमः ।
वसुधायै नमः ।
वसुधारिण्यै नमः ।
कमलायै नमः ।
कान्तायै नमः ।
कामाक्ष्यै नमः ।
क्रोधसंभवायै नमः ।
४ अनुग्रहपदायै नमः । ३०
बुद्धये नमः ।
अनघायै नमः ।
हरिवल्लभायै नमः ।
अशोकायै नमः ।
अमृतायै नमः ।
दीप्तायै नमः ।

ओं लोकशोकविनाशिन्यै नमः

५ धर्मनिलयायै नमः ।

करुणायै नमः ।

लोक(वेद)मात्रे नमः ।४०

पद्मप्रियायै नमः ।

पद्महस्तायै नमः ।

पद्माक्ष्यै नमः ।

पद्मसुन्दर्यै नमः ।

६ पद्मोद्भवायै नमः ।

पद्ममुख्यै नमः ।

पद्मनाभप्रियायै नमः ।

रमायै नमः ।

पद्ममालाधरायै नमः ।

देव्यै नमः । ५०

पद्मिन्यै नमः ।

पद्मगन्धिन्यै नमः ।

७ पुण्यगन्धायै नमः ।

सुप्रसन्नायै नमः ।

प्रसादाभिमुख्यै नमः ।

प्रभायै नमः ।

चन्द्रवदनायै नमः ।

ओं चन्द्रायै नमः ।

चन्द्रसहोदर्यै नमः ।

८ चतुर्भुजायै नमः । ६०

चन्द्ररूपायै नमः ।

इन्दिरायै नमः ।

इन्दुशीतलायै नमः ।

आह्लादजनन्यै नमः ।

पुष्ट्यै नमः ।

शिवायै नमः ।

शिवकर्यै नमः ।

सत्यै नमः ।

९ विमलायै नमः ।

विश्वजनन्यै नमः । ७०

तुष्टये नमः ।

दारिद्र्यनाशिन्यै नमः ।

प्रीतिपुष्करिण्यै नमः ।

शान्तायै नमः ।

शुक्लमाल्याम्बरायै नमः ।

श्रियै नमः ।

१० भास्कर्यै नमः ।

बिल्वनिलयायै नमः ।

ओं वरारोहायै नमः ।
यशस्विन्यै नमः । ८०
वसुन्धरायै नमः ।
उदाराङ्गायै नमः ।
हरिण्यै नमः ।
हेममालिन्यै नमः ।
११ धनधान्यकर्यै नमः ।
सिद्धये नमः ।
स्त्रैणसौम्यायै नमः ।
शुभप्रदायै नमः ।
नृपवेश्मगतानन्दायै नमः
वरलक्ष्म्यै नमः । ९०
वसुप्रदायै नमः ।
१२ शुभायै नमः ।
हिरण्यप्राकारायै नमः ।
समुद्रतनयायै नमः ।

ओं जयायै नमः ।
मङ्गलदेवतायै नमः ।
विष्णुवक्षःस्थलस्थितायै नमः ।
१३ विष्णुपत्न्यै नमः ।
प्रसन्नाक्ष्यै नमः ।
नारायणसमाश्रितायै नमः । १००
दारिद्र्यध्वंसिन्यै नमः ।
देव्यै नमः ।
सर्वोपद्रववारिण्यै नमः ।
१४ नवदुर्गायै नमः ।
महाकाल्यै नमः ।
ब्रह्मविष्णुशिवात्मिकायै नमः । [नमः ।
त्रिकालज्ञानसंपन्नायै
भुवनेश्वर्यै नमः । १०८

———



श्रीः

श्रियै नमः

# श्रीलक्ष्मीसहस्रनाम स्तोत्रम्

# ŚRĪLAKṢMĪSAHASRANĀMA STOTRAM

श्रीलक्ष्मीसहस्रनामस्तोत्रं प्रारभ्यते ॥

अस्य श्रीमहालक्ष्मीसहस्रनामस्तोत्रमहामन्त्रस्य श्रीमहाविष्णुर्भगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीः देवता । श्रीं बीजम्, ह्रीं शक्तिः, हैं कीलकम्, श्रीमहालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

## ध्यानम् ॥

पद्मानने पद्मकरे सर्वलोकैकपूजिते ।
सान्निध्यं कुरु मे चित्ते विष्णुवक्षःस्थलस्थिते ॥ १ ॥

भगवद्दक्षिणे पार्श्वे श्रियं देवीमवस्थिताम् ।
ईश्वरीं सर्वभूतानां जननीं सर्वदेहिनाम् ॥ २ ॥

चारुस्मितां चारुदतीं चारुनेत्राननभ्रुवम् ।
सुकपोलां सुकर्णाग्रन्यस्तमौक्तिककुण्डलाम् ॥ ३ ॥

सुकेशां चारुबिंबोष्ठीं रक्ततुंगघनस्तनीम् ।
अलकाग्रैरलिनिभैरलंकृतमुखांबुजाम् ॥ ४ ॥

लसत्कनकसंकाशां पीनसुन्दरकन्धराम् ।
निष्ककण्ठीं स्तनालंबिमुक्ताहारविराजिताम् ॥ ५ ॥

नीलकुन्तलमध्यस्थमाणिक्यमकुटोज्ज्वलाम् ।
शुक्लमाल्यांबरधरां तप्तहाटकवर्णिनीम् ॥ ६ ॥

अनन्यसुलभैस्तैस्तैर्गुणैः सौम्यमुखैर्निजैः ।
अनुरूपानवद्यांगीं हरेर्नित्यानपायिनीम् ॥ ७ ॥

## ॥ श्रीलक्ष्मीसहस्रनामस्तोत्रम् ॥

श्रीवासुदेवमहिषी पुंप्रधानेश्वरेश्वरी ।
अचिन्त्यानन्तविभवा भावाभावविभाविनी ॥ १ ॥

अहंभावात्मिका पद्मा शान्तानन्तचिदात्मिका[1] ।
ब्रह्मभावं गता[2] त्यक्तभेदा सर्वजगन्मयी ॥ २ ॥

षाड्गुण्यपूर्णा त्रय्यन्तरूपाऽऽत्मानपगामिनी ।
[3]एकयोग्याऽशून्यभावाकृतिस्तेजःप्रभाविनी ॥ ३ ॥

[4]भाव्यभावकभावाऽऽत्मभाव्या कामधुगात्मभूः ।
भावाभावमयी दिव्या भेद्यभेदकभावनी[5] ॥ ४ ॥

जगत्कुटुम्बिन्यखिलाधारा कामविजृंभिणी ।
पञ्चकृत्यकरी पञ्चशक्तिमय्यात्मवल्लभा ॥ ५ ॥

भावाभावानुगा सर्वसम्मताऽऽत्मोपगूहिनी ।
अपृथक्चारिणी सौम्या[6] सौम्यरूपव्यवस्थिता ॥ ६ ॥

आद्यन्तरहिता देवी भवभाव्यस्वरूपिणी ।
महाविभूतिः समतां गता ज्योतिर्गणेश्वरी ॥ ७ ॥

---

**पा.** [1] जितात्मिका—श्री. [2] त्यक्तभीता—श्री.
[3] एकयोक्ताशून्यभावा कृतिस्तेजः प्रभाविनी—ति.
[4] भाव्यभावकभावात्मा भाव्या कामयुगात्मभूः—ति.
[5] भावगा-श्री. [6] सौम्यरूपाऽव्यवस्थिता-श्री.

सर्वकार्यकरी धर्मस्वभावात्माऽग्रतः स्थिता !
आज्ञासमविभक्ताङ्गी ज्ञानानन्दक्रियामयी ॥ ८ ॥

स्वातन्त्र्यरूपा देवोरःस्थिता तद्धर्मधर्मिणी ।
सर्वभूतेश्वरी सर्वभूतमाताऽऽत्ममोहिनी ॥ ९ ॥

सर्वाङ्गसुन्दरी सर्वव्यापिनी प्राप्तयोगिनी ।
विमुक्तिदायिनी [१] भक्तिगम्या संसारतारिणी ॥ १० ॥

[२] धर्मार्थसाधिनी व्योमानिलया व्योमविग्रहा ।
पञ्चव्योमपदी [३] रक्षव्यावृतिः प्राप्यपूरिणी ॥ ११ ॥

आनन्दरूपा सर्वाप्तिशालिनी शक्तिनायिका ।
हिरण्यवर्णा हैरण्यप्राकारा हेममालिनी ॥ १२ ॥

[४] प्रत्नरत्ना भद्रपीठा वेशिनी रजतस्रजा ।
स्वाज्ञाकार्यमरा [५] नित्या सुरभिर्व्योमचारिणी ॥ १३ ॥

योगक्षेमवहा सर्वसुलभेच्छाक्रियात्मिका ।
[६] करुणाग्रानतमुखी कमलाक्षी शशिप्रभा ॥ १४ ॥

---

पा. [१] भक्तगम्या-श्री.
[२] धर्मार्थवादिनी-श्री. [३] रक्षा व्यापृतिः प्राप्तिपूरिणी-ति.
[४] प्रस्फुरत्ता भद्रहोमा-श्री. [५] नित्यसुरभिः.
[६] अयं पाठः पूर्वाचार्यैरादृतः । करुणास्नानतमुखी-ति । .
महासमूहा निखिलप्ररोहा वेदगोचरा'-श्रीरंगपाठे
इत्थं वर्ततेऽत्र ।

[1]कल्याणदायिनी कल्या कलिकल्मषनाशिनी ।
प्रज्ञापरिमिताऽऽत्मानुरूपा [2]सत्योपयाचिता ॥ १५ ॥

मनोज्ञेया ज्ञानगम्या [3]नित्यमुक्तात्मसेविनी ।
कर्तृशक्तिः सुगहना भोक्तृशक्तिर्गुणप्रिया ॥ १६ ॥

* ज्ञानशक्तिरनौपम्या [4]निर्विकल्पा निरामया ।
[5]अकलङ्काऽमृताधारा महाशक्तिर्विकासिनी ॥ १७ ॥

महामाया महानन्दा [6]निःसङ्कल्पा निराश्रया ।
एकस्वरूपा त्रिविधा संख्यातीता निरञ्जना ॥ १८ ॥

[7]आत्मसत्ता नित्यशुचिः परशक्तिः सुखोचिता ।
नित्यशान्ता निस्तरङ्गा निर्भिन्ना सर्वभेदिनी ॥ १९ ॥

असङ्कीर्णाऽविधेयात्मा [8]निषेव्या सर्वपालिनी ।
निष्कामना सर्वरसाऽभेद्या सर्वार्थसाधिनी ॥ २० ॥

अनिर्देश्याऽपरिमिता निर्विकारा त्रिलक्षणा ।
